ṚGVEDĪYAṂ ŚAMĀNALAKṢAṆAM UPALEKHASŪTRAṂ CA

ṚGVEDĪYAṂ ŚAMĀNALAKṢAṆAM UPALEKI

K
33
3
967
ASIAN



ऋग्वेदीयं


शमानलक्षणम्

उपलेखसूत्रं च ॥

नाञ्चल्लुरु सलक्षणघनपाठिनां श्री कृष्णमूर्तिशास्त्रिणां
अन्तेवासिना कृष्णराजपुराभिजनेन
दशग्रन्थि श्री वेङ्कटरामशास्त्रिणा संकलितम् ।

श्रीवाणीविलासमुद्रालयः, श्रीरङ्गम् ।

1967 [Rs. 2/-



श्रीदक्षिणाम्नाय शृङ्गगिरि श्रीशारदापीठाधिपति श्रीजगद्गुरु

श्रीमदभिनवविद्यातीर्थमहास्वामिनः ।

श्री श्री शृङ्गेरी जगद्गुरु महासंस्थानं,
शृंगेरी मठ शारदापीठम् ।

शृङ्गेरी-कडूर (मैसूर् स्टेट्)

Sri Sri Sringeri Jagadguru Mahasamsthanam,
Sringeri Math Sharada Peetham

SRINGERI-KADUR (MYSORE STATE)

S. Sankaranarayana Rao,
B. A. B. L.,
Private Secretary.

Office of the Private Secretary
to His Holiness The Jagadguru
Sri Sankaracharya of Sri Sringeri Mutt.
Camp : बम्बई
Dated : १३—१०—१९६७

वेदमूर्ति श्री वेङ्कटरामशास्त्रिणः, सन्तु नमस्काराः,

भवद्भिः प्रहितं शमानप्रकरणं उपलेखसूत्रमिति ग्रन्थद्वयं आचार्यचरणदृष्टिपथमुपनीतम् । वेदस्य हि अध्ययनं शब्दतो लक्षणतश्च कर्तव्यं भवति । भवद्भिः प्रकाशितं लक्षणग्रन्थद्वयमपि ऋग्वेदाध्यायिनां नितरां उपकारकमास्ते । पाणिनीय-व्याकरणप्रसरणानन्तरं तत एव लक्षणावगतेः पृथग्लक्षणग्रन्थानां प्रचारो विरलः संजातः । भवन्तः महता प्रयत्नेन तेषां ग्रन्थानां परिशोधनं विधाय प्रकाशनं विदधत इति श्रीचरणाः हृष्यन्ति । श्रीशारदाचन्द्रमौळीश्वरयोः कृपापरंपरया मुद्रितं इदं पुस्तकद्वयं वेदज्ञानां पाणिपल्लवानि उपारूढं ज्ञानमभिवर्धयत्वित्याशासते श्रीचरणाः ॥

इति निवेदयिता,

(Sd.) S. Sankaranarayana Rao.

वेदमूर्तेः नाञ्जलूरु कृष्णमूर्तिशास्त्रिणः

मङ्गळाशासनम् ॥

चिरञ्जीविनः K. S. वेङ्कटरामस्य सन्तु अनेका आशिषः इति प्रथममाशीर्वचनपूर्वकं N. S. कृष्णमूर्तिघनपाठी निवेदयति। उभयकुशलोपरि। भवत्प्रहितं उपलेखसूत्रादिकं समासादितं यत्पठित्वा अनल्प आनन्दमलभे। दिनद्वयं मुहुर्मुहुः पठितोऽयं ग्रन्थः सुबहु मे रोचते।

किंच इदानींतनानामध्येतॄणां महते उपकाराय कल्पमानोऽयं ग्रन्थः बह्वृचानां सर्वेषामपि मनो नूनं समुल्लासयिष्यति इति सुदृढं विश्वसिमि।

एतादृशपुस्तकमुद्रणप्रकाशनेन बह्वृचलोको भवते यत्सत्यं सुबहु धारयतीति निश्चप्रचं वच्मि।

नटराजस्य कृपया मदीयाभिर्हार्दाभिराशीर्भिश्च परमक्षेमभाजनं भूया इति भगवन्तं हृदि निधाय ते मङ्गलान्याशासे ॥

इति

N. S. कृष्णमूर्तिघनपाठी,

चिदम्बरवास्तव्यः।

॥ श्रीः ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ प्रस्तावना ॥

आर्याः, सुविदितमिदं सर्वेषां यत् बह्वृचानां जटाघनपाठपद्धति-मध्येतॄणां सौकर्याय 'ऋग्वेदजटालक्षणम्' 'ऋग्वेदघनसारः' इति ग्रन्थद्वयमस्माभिः प्रकाशितमिति, बह्वृचप्रवराश्च तद्ग्रन्थद्वयदृष्टारः तत्प्रकाशनं सबहुमानमभ्यनन्दन् इति च। इत्थं तैः प्रोत्साहिता वयं पदपाठं क्रमपाठं च विशुद्धं शिक्षितुमीहमानानां सौकर्याय इदानीं शमानप्रकरणं उपलेखसूत्रं च प्रकाशयामः ॥

पदविभागे संहितायां लुप्तविसर्जनीयानां पदानां निरवशेषेण संकलनं कृत्वा महता प्रयत्नेन, अनल्पेन चायासेन विरचितं शमानप्रकरणमिति तद्वाचयितुः स्पष्टमेव उपलभ्येत। कुत्र विसर्गो लुप्यते कुत्र नेति निर्णेतुं परमवैयाकरणोऽपि यत्सत्यं मुह्येतापि, किमुत केवलाधीतिनः। अतः पदविभागे सविसर्गपदानि इमानि, लुप्तविसर्गानि चेमानि इति स्पष्टं सन्धिशास्त्रन्यायसंचारनिरपेक्षं करतलामलकवत्प्रदर्शनं नूनं महते सौकर्याय भवेदिति नात्युक्तिरियम्। क्वचिच्च वैदिकपरिपाटी पाणिन्यादिशासनं नानुरुन्धे खलु ॥

क्रमपाठे दीर्घत्व-ह्रस्वत्व-वेष्टन-यत्किंचिदक्षरलोपादिकं वैदिक-परम्परामात्रसमधिगम्यं संकलय्य उपलेखसूत्रं सोदाहरणप्रत्युदाहरणं विरचितम्। ग्रन्थद्वयमिदमिदानीं प्रकाश्यमानं बह्वृचप्रवराः यथापुरं सामिमानं स्वीकृत्य अस्मान् आशीर्भिर्योजयेयुरिति विश्वसिमः ॥

अस्तु च यथापुरं अभिनन्दनश्रीमुखप्रदानेनास्मान् अनुगृहीतवतां

जगद्गुरूणां श्रीमत्परमहंसपरिव्राजकाचार्याणां दक्षिणाम्नाय शृङ्गेरी श्रीमच्छारदापीठाधीश्वराणां चरणराजीवयोः सविनयं प्रणामपरम्परां समर्पयामः । अस्मद्गुरूणां नाञ्जलूरु कृष्णमूर्तिघनपाठिनां पादपङ्कजे सविनयं प्रणमामः ॥

इदं च ग्रन्थद्वयं अस्मासु आदरेण वैदिकधर्मप्रचारेऽनल्पया च श्रद्धया मुद्रितवद्भ्यः श्रीवाणीविलासमुद्रणालयनिर्वाहकेभ्यः धन्यवादांश्च हार्दान् ब्रूमः ॥

जम्बुकेश्वरम्,
प्लवङ्गवृश्चिकशुक्लैकादशी ।

इति
बहूवृचानां कृपापात्रं
K. S. वेङ्कटरामशास्त्री,
दशग्रन्थी ।

॥ शुद्धाशुद्धपट्टिका ॥

शमानप्रकरणम् ।

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
५	६	राध्यः	दुराध्यः
,,	८	तुरईं याम्	तुरइयाम्
८	९	नेवपूर्वाः	नेवपूर्वः
१५	१२	चित्रः	चित्रा
२५	,,	मिनवाम	मिनवामा
२७	१७	देव	देवा
,,	२४	प्रवती	प्रपृञ्चती
२८	४	धाना	धा
२९	६	ब्राह्मणस्योपनीत	ब्राह्मणस्योपनीता
३२	१४	माबिभीषया	माबिबीभिषथा
३३	१	शर्यातस्य	शार्यातस्य
३५	११	यजिष्ठत्वो	यजिष्ठन्त्वा
३६	१०	वह्नि	वह्नी
३८	,,	रथीतम	रथीतमा
४५	२०	स्थापयामसि	स्थापयामसि
४८	६	नीयद्रश्मान	दीयद्रश्मान

उपलेखसूत्रम् ।

५०	१०	ऽनुनस्वार	ऽनुस्वार
५१	१९	अर्द्धर्चात्	आर्द्धर्चात्
,,	२०	सन्दध्यात्	न सन्दध्यात्
५२	५	गव्येषुणः	गव्योषुणः
५५	१४	सहवन्तु ते	सहवर्तते

पृष्ठं	पंक्तिः	अशुद्धम्	शुद्धम्
५६	१२	मित्रायोराँ	मित्रयोराँ
५७	,,	सन्ध्यात्	सन्दध्यात्
५८	२	शतमासहस्रम् । आ सहस्रं । सहस्रं भूम्याः ।	शतमासहस्रम् । सहस्रं भूम्याः ।
,,	४	विष्णोरसूर्यात् । आसूर्यात् । सूर्यादभरन्	विष्णोरासूर्यात् । सूर्यादभरन्
,,	१०	अविद्याम	आविद्याम
६२	३	स्रश्चन्द्रमिति	स्रचन्द्रमिति
,,	१५	दुर्दभसा	दुर्दभास
६३	६	आकाराकारौ	अकाराकारौ
६४	१	एकार आकारभूतो विवृत्य । विन्दतीति	विन्दतीति
,,	१९	देवंयाः परावताः	देवंभाः भाः परावतः
,,	२४	तरणीभिः	तरणिभिः
६५	९	तच्छ	तच्च
६६	१३	स्वरदक्तः	स्वरयुक्तः
७०	९	अर्थमात्रञ्च	अर्धमात्रञ्च
७२	४	मध्ये भवति । तदा	मध्ये तदा
,,	६	मरन्ति	मरन्ति नो

—×—

॥ श्रीः ॥



॥ श्रीगुरुभ्यो नमः ॥

॥ शमान प्रकरणम् ॥

प्रणम्य प्रणताभीष्टप्रदातारं पतिं श्रियः ।
बह्वृचानां सुबोधाय शमानं क्रियते लघु ॥

शमानमिति यद्यपि संहिताकाले लुप्तविसर्जनीयानां पदानामेव पूर्वाचार्यकृता संज्ञा, तथापि य एषः तत्प्रतिपादकग्रन्थोपि लक्षणया उपचाराच्च 'शमानं' इत्युच्यते । पूर्वलक्षणानां अतिविस्तृतत्वात् असंगतत्वाच्च संग्रहरूपं अकारादिवर्णक्रमेण सुबोधकत्वात् संगतमिदमेव लक्षणं ग्राह्यमिति दर्शयितुं लघित्युक्तम् ॥

अवतारिका — इदानीं लक्षणस्य विषयमाह विसर्जनीय इत्यादिना सार्धश्लोकेन —

विसर्जनीय आकारपूर्वको घोषवत्परः ।
व्यञ्जनस्पृक्शसपरो लुप्यते संहिताक्षणे ॥
एषु वर्णक्रमात्तानि प्रवक्ष्यामि पदान्यहम् ॥ इति ।

आकारः पूर्वो यस्मात् स तथोक्तः । घोषवन्तौ वर्णौ यस्मात् परौ स तथोक्तः । व्यञ्जनं हलं स्पृशत इति व्यञ्जनस्पृशौ, व्यञ्जनोत्तरावित्यर्थः । शकारश्च सकारश्च शसौ, व्यञ्जनस्पृशौ च तौ शसौ च व्यञ्जनस्पृक्शसौ,

तौ वक्ता यस्मात् सः तथोक्तम्। ([1]ग घ ङ ज झ ञ ड ढ ण द ध न ब भ म य र ल व ह, इत्येतेषां वर्णानां घोषवत्संज्ञा भवति। व्यंजनस्पृक्शसपरौ तु श्चः, स्मः इत्यादिरूपौ।) ततश्च अयं अर्थः — आकारपूर्वको घोषवद्व्यंजनोत्तरशसपरो विसर्जनीयो येषु अजोषा इत्यादिषु (वक्ष्यमाणेषु पदेषु) संहिताकाले लुप्तो भवति, तानि पदानि पदकाले सन्दिग्धानि सन्ति। तान्येव इदानीं अकारादिक्रमेण प्रवक्ष्यामि॥

[2] अत्रेदं बोध्यम् —आकारपूर्वकघोषवद्व्यञ्जनस्पृक्शसपरस्य विसर्जनीयस्य संहिताकाले दर्शनाभावात् स विसर्गः पदविभागः कर्तव्यः उत अविसर्ग इति सन्देग्धृणां सन्देहापनुत्तये संहितायां यानि लुप्तविसर्गाणि पदानि, पदकाले तु सविसर्गपदानि च भवन्ति तानि प्रवक्ष्यामि इति। अत्र प्रेत्युपसर्गेण अकारादिवर्णक्रमेण पठनं द्योत्यते। आकारपूर्वक इति किं? इन्द्र वायू बृहस्पतिं द्यौर्वः पिता पृथिवी माता। इत्यत्र न। ऐभिर्जगन्वान् द्यौर्व इत्यनेन वक्ष्यमाणसूत्रेण विसर्गप्राप्तिः। घोषवत्पर इति किं? ता चक्राणा ऊतिभिः मही मित्रस्य वरुणस्य माया चन्द्रेव। इत्यत्र न। तोके हिते वायो शुक्रो माया न मायया पूर्वे इत्यनेन विसर्गप्राप्तिः। व्यञ्जनोत्तरग्रहणं किं? दिवा पृथिव्या शृणुतम्। द्यौर्वः पिता पृथिवी माता सोमः। शसपर इत्युच्यमाने न को अस्येमं मे द्यौर्व इत्यादिना प्राप्नोति। लक्षणसंग्रहानुग्राहकत्वात्। इंग्यपृथक्पृथक्त्वं लाघवार्थं अंगीकरणीयम्। अन्यथा प्रजाः प्रा इत्यादौ बहुप्रजा-अन्तरिक्षप्रा इति पूर्वभागस्यापि ग्राह्यत्वे सति ग्रन्थगौरवं स्यात्। 'पूर्वभागस्त्ववग्रह' इति तेषां इंग्यपदानां पूर्वभागः पूर्वपदमवग्रह इत्युच्यते। तदुक्तं तैत्तिरीयप्रातिशाख्ये 'नानापदवत् इंग्यं संख्याने तस्य पूर्वपदमवग्रह' इति। अवग्रहसंज्ञायाः उत्तरत्र प्रयोजनं वक्ष्यति॥

---

१ एतत् ग्रन्थकारेणाप्युपरि वक्ष्यते। २ फलितार्थमित्यर्थः।

अव०—अस्मिन् लक्षणे वातपरो विननिपरश्चेत्यादौ यत् वात-वि-इत्यादीनां परनिमित्तत्वं तत्र एकं पदमेव निमित्तम् उत पदैकदेशः इति जिज्ञासायामाह (कर्तव्यं प्रतिज्ञाय परिभाषामारभते) —

निमित्तं गृह्यते यत्तत् पदमेवात्र लक्षणे ॥ इति ।

अस्मिन् लक्षणे वातपरो विननिपरश्च इत्यादौ यत्-वात-वि इत्यादिकं निमित्तत्वेन गृह्यते तत्पदमेव न तु पदैकदेशः । तेन स्यू मन्यू इति ऋज्रा-वातस्याश्वा एता विश्वा चक्रमान् इत्यादौ वातस्य विश्वादिपरस्य ऋज्रा, एता इत्यादौ विसर्जनीयान्तत्वं न भवति ॥

अव०—पूर्वत्र घोषवत्पर इत्युक्तम् । तत्र के वर्णाः घोषवन्त इत्यपेक्षायामाह —

प्रथमांश्च द्वितीयांश्च हित्वा वर्ग्यास्त्रयस्त्रयः ।
अन्तस्थाश्च हकारश्च घोषवन्तः प्रकीर्तिताः ॥

कचटतपाः प्रथमाः । ख छ ठ थ फाः द्वितीयाः । एतान् हित्वा । वर्ग्यास्त्रयस्त्रयः । वर्गे भवाः वर्ग्याः । कादिमान्ता वर्णाः पञ्च पञ्च वर्गशब्देन उच्यन्ते । 'स्पर्शानामानुपूर्व्येण पञ्च पञ्च वर्ग्याः इति' इति वैदिकैरुक्तत्वात् ग घ ङाः, ज झ ञाः, ड ढ णाः, द ध नाः, ब भ माः, यरलवाः, हकारश्च घोषवन्त इति वैदिकोत्तमैरुक्ताः ॥

अव०—* वर्णक्रमेण पदानि वक्ष्यामीत्युक्तम् । तानि पदानि यथा संप्रदर्शयितुमाह अजोषा इत्यादिना —

१ अजोषा, २ अवा, ३ अस्या, ४ अयच्छथा,
५ अवाता, ६ अप्रा, ७ अप्सा, ८ अमित्रा, ९ अपश्या,

*अस्मिन् लक्षणे विधीयमानः पदानां विसर्गः आकारात्परः घोषवद्यञनोत्तरशसकारेभ्यः पूर्वश्च भवतीति सर्वत्र अवगन्तव्यम् ।

१० अदृष्टा, ११ अयना, १२ अस्तभ्ना, १३ अन्यस्या, १४ अभ्रिया, १५ अस्मेरा, १६ अपा, १७ अपृणा, १८ अगा, १९ अदधा, २० अर्का, २१ अघन्याया, २२ अदब्धा, २३ अवीता, २४ अरिष्टा, २५ अमा, २६ अकवा, २७ अरेफा, २८ अग्रा, २९ अप्या, ३० अधृष्टा, ३१ अन्तमा, ३२ अवीरा, ३३ असमना, ३४ अज्ञाता, ३५ अगोपा, ३६ अनागा, ३७ अयक्ष्मा, ३८ अन्ता, ३९ अनेना, ४० अरात्या, ४१ अपवथा, ४२ अजा, ४३ अनूपा, ४४ अपरस्या, ४५ अक्रा, ४६ अंगिरा, ४७ अपुष्पा, ४८ अरथा, ४९ अनाधृष्या, ५० अस्थिता, ५१ अनूधा, ५२ अप्सरा, ५३ अजायथाः ॥

एतानि पदानि आकारपूर्वघोषवद्व्यञ्जनोत्तरशसकारपरविसर्गान्तानि भवन्ति। उदाहरणानि — १ अजोषा वृषभं पतिम्, २ अवाजेषु यं-जुनाः, ३ आख्या वस्रिम विभुचं नावृतं पुनः, ४ अयच्छथा बाह्वो-र्वज्रमायसम्। ५ सनात्सनीळा अवनीरवाताः। ६ आप्रा द्यावापृथिवी अन्तरिक्षम्। ७ रथो वां मित्रा वरुणा दीर्घाप्साः। ८ अभिल्लग्य यत्र हता अमित्राः। ९ अन्धा अपश्या नदभन्नभिख्या। १० मौञ्जा अदृष्टा वैरिणाः। ११ द्वारो देवीः सुप्रायणा नमोभिः। १२ पळस्तभ्ना विष्टिरः पञ्च संदृशः। १३ अन्यस्या वत्सं रिहतीमिमाय। १४ व्य१भ्रिया न द्युत यन्तवृष्टयः। १५ तमस्मेरा युवतयो युवानम्। १६ शश्वत्तमं तदपा वह्नि-रस्थात्। १७ आरोदसी अपृणा जायमानः। १८ कविशस्तो बृहता भानु-नागाः। १९ यस्मै धायुरदधा मर्त्याय। २० विष्णुं स्तोमासः पुरुदस्समर्काः। २१ शुची घृतं न तप्तमन्नयाथाः। २२ कविं शशासुः कवयोऽदब्धाः।

२३ विहिहोत्रा अवीताः । २४ तवोतिभिः सचमाना अरिष्टाः । २५ स्तनयदमारभसा उदोजसः । २६ प्रप्रजायन्ते अकवा महोभिः । २७ सूरो नयस्य दृशतिररेफाः । २८ चन्द्राग्रा धियम् । २९ गोजाता अप्या मृळना च देवाः । ३० ग्राहुनासो वसवोधृष्टाः । ३१ सुम्नेष्विद्धो अन्तमा मदेम । ३२ मात्वा वयं सहसा वन्नवीराः । ३३ असमना जहतीर्भोजनानि । ३४ मानो अज्ञाता वृजना रंध्यः । ३५ ईयुर्गावो नयव-सादगोपाः । ३६ यदद्य सूर उदिते नागाः । ३७ अयक्ष्मा बृहतीरिषः । ३८ संभूम्या अन्ताध्वसिरा अदृक्षत । ३९ अवत्वानेनानमसातुरइं याम् ॥

४० उतान्यस्या अरात्या वृकोहिषः । ४१ यथापवथा मनवे वयोधाः । ४२ अजाधुरं ववृत्युः । ४३ लयस्तपन्ति पृथिवीमनूषाः । ४४ प्रते अस्या उषसः प्रापरस्याः । ४५ आदित्यासस्ते अक्रा नवा वृधुः । ४६ रेभदत्र जनुषा पूर्वो अंगिराः । ४७ याः फलिनीर्या अफला अपुष्पाः । ४८ अपादो यत्र युज्यासोरथाः । ४९ अनाधृष्या यथासथ । ५० समस्थिता युधये शंसमाविदे । ५१ अनूधा यदि जिजनदधाचनु । ५२ अप्सरा जारमुपसिष्मियाणा । ५३ अजायथा वृषभ चर्षणीनाम् ॥

यस्य अनूनाः । तस्थु, रत्याः । जवे, ष्वसमाः ।
अपप्तन्न, रुणाः । ये, मखा, अमिताः । युवो, रच्छिद्राः ।
समन्याः । ध्रुवं, परि, अयाः । सद्मन्, वां, अरुषाः ।
ओजोऽमर्त्याः । समुद्रार्थाः । ईव्यक्ताः ॥

यस्येत्यादिषु पूर्वेषु सत्सु अनूना इत्यादयो विसर्गान्ता भवन्ति (उद) (यस्य अनूनाः) यस्यानूना गभीराः । [तस्थुः अत्याः] तिस्रोमहीरुपरा-स्तस्थुरत्याः । (जवेषु असमाः) मनोजवेष्वसमा बभूवुः । (अपप्तन् अरुणाः) उदपप्तन्नरुणा भानवोवृथा ॥

यस्य इत्यादिषु पूर्वैष्विति किं? दानो वाजं नियमते न ऊती, अनूना यस्य दक्षिणा पीपाय इत्यत्र न। वृषणः शुक्राँश्च। अत्यावृधन्नू इत्यत्र न। द्वाजनां असमा बाहुभिः स्वैः अत्र न। वायुर्युङ्क्ते रोहिता वायुररुणा। अत्र च न॥

येमखापूर्वौ अमिता इति विग्रहः। ये च मखाश्च इति पूर्वद्वन्द्वः। ये मखा इत्येतौ पूर्वौ यस्मात् अमिताशब्दात् इति पञ्चाद्बहुव्रीहिः। ततः उत्तरपदलोपी तत्पुरुषः। 'ये मखा अमिताः'। द्वन्द्वात्परं श्रूयमाणः अमिताशब्दः ये, मखा, इत्येताभ्यां प्रत्येकं अभिसंबध्यते। ये मखा इत्येवंपूर्वं अमिताशब्दो विसर्गान्तो भवति। एवमेव उत्तरत्रापि एतादृशेषु पदेषु समासात् द्रष्टव्यः। [उदा] 'ये' मयोभुवो ये अमिता महित्वा। [मखा] शुभे मखा अमिता जायवो रणे। ये मखा इति किं? अनुस्वधामितादस्ममीयते। पुरूवरांस्यमितामिमाना॥

[युवोः अच्छिद्राः] युवोरछिद्रामन्तवो ह सर्गाः। युवोरिति किं? स्वधितिः समेति। अच्छिद्रा गात्रा इत्यत्र न। [सं अन्याः] समन्यायन्त्युपयन्त्यन्याः। समिति किं? अन्यान्यावत्समुपधापयेते। [ध्रुवं, परि, अयाः] [ध्रुवं] ध्रुवमया ध्रुवमुता शमिष्ठाः। [परि] सहस्रसाः पर्यया वाजमिन्दो। ध्रुवं परीति किं? प्रभृतिं य ईशिषे या विधेम। इत्यत्र न। (सद्मन् वां अरुषाः) [सद्मन्] ये वा सद्मन्नरुषा वीरवाहः। (पाठ) परिवामरुषावयः। सद्मन्वामिति किं? यदयुक्था अरुषा रोहिता रथे इत्यत्र न। [ओजोऽमर्त्याः] अनु द्यावापृथिवी तत्त ओजोऽमर्त्याः। ओज इति किं? उषो देव्यमर्त्या विभाहि इत्यत्र न। (समुद्रअर्थाः) समुद्रार्थायाः शुचयः। समुद्रेति किं? कदर्थान आगृहम् इत्यत्र न। (ईं, वि, अक्ताः) क ईं व्यक्ता नरः सनीळाः: ईं वीति किं? आलाक्तायारुहच्छीर्ष्णी। प्रियातष्टानि मेकपिर्व्यक्ता इत्यत्र न॥

अमीवा निःपरः ॥

निः परः यस्मात् सोयं निष्परः । निष्परःअमिता इति पदरूपः शब्दः विसर्जनीयान्तो भवति । उदा० अपत्या अस्थुरनिरा अमीवाः । निष्पर इति किं? अमीवा यस्ते गर्भम् । इत्यत्र न ॥

अमृताः ॥

अमृता इति पदरूपः शब्दो विसर्गान्तो भवति ॥

उद० ते अस्मभ्यं शर्म यंसन्नमृताः ॥

न प्रियाधामानिपूर्वः ॥

प्रियाधामानि, इत्येवं पूर्वे सति अमृता इति पदरूपः शब्दः विसर्जनीयान्तो न भवति ॥

उदा० प्रिया धामान्यमृता दधानः । प्रियेति किं? ते धामान्यमृता मर्त्यानाम् ॥

अश्वाः ॥

अयं विसर्जनीयान्तो भवति । पृषदश्वा मरुतः पृश्निमातरः ॥

न विनयशसा गिरोवातस्य परः ॥

वि, न, यशसा, गिरः, वातस्य एतेषु पदेषु परेषु सत्सु सान्निध्याल्लब्धः अश्वा इति पदरूपः शब्दः विसर्गान्तो न भवति ॥

उदा० वि–प्रसेतामश्वाविमुच । न–अश्वानचित्रावपूषीव । यशसा–स्वश्वा यशसा यातमर्वाक् । गिरः–आशुश्रायातमश्विना स्वश्वागिरोदस्रा । वातस्य–युजानो अश्वा वातस्य ॥

अर्णाः ॥

अयं विसर्गान्तो भवति ॥ (उदा) ऋणोरपो अनवद्यार्णाः ॥

न धीरापरः ॥

धीरा परः यस्मात् सः धीरापरः । तथाभूतः धीरा इति पदरूपः शब्दः विसर्गान्तो न भवति ॥ उदा० अर्णाधीरेव सनिता ॥

अजुर्याः ॥

अयं विसर्गान्तो भवति ॥

उदा० प्राञ्चो मदन्त्युक्षणो अजुर्याः ॥

नेवपूर्वाः ॥

पूर्वसूत्रात् अजुर्या इत्यनुवर्तते । इवपूर्वं अजुर्या इति पदं विसर्जनीयान्तं न भवति ॥

उदा० वातेवाजुर्या नद्येवरितिः ॥

अरिप्रा हिन्वन्तिपरः ॥

पूर्ववत् बहुव्रीहिः । हिन्वन्तिपरः अरिप्रा इति शब्दः विसर्गान्तो भवति । उदा० स्वसारो मातरि भ्वरीररिप्राहिन्वन्ति । हिन्वन्तिपर इति किं? अरिप्रावृत्रहन्तमातानः इत्यत्र न ॥

आस्क्रा आहना आशुषाणाः ॥

एतानि पदानि विसर्गान्तानि भवन्ति ।

उदा० [आस्क्राः] आनो विश्वआस्क्रागमन्तु देवाः । [आहनाः] य आहना दुहितुर्वक्षणासु । [आशुषाणाः] अश्यामतत्सासमाशुषाणाः ॥

जाआर्याः ॥

जापूर्व आर्या इति शब्दो विसर्जनीयान्तो भवति ।

उदा० तिस्रः प्रजा आर्या ज्योतिरग्राः । जा इति किं? सूर्यं दिवि रोहयन्तः सुदानव आर्या इत्यत्र न ।

आदित्याः ॥

अयं विसर्गान्तो भवति । उदा० ये चिद्धि मृत्युबन्धव आदित्याः ॥

न कृतमुताशातेपूर्वः ॥

कृतं, उत, आशाते इत्येवंपूर्व आदित्या इति शब्दो विसर्जनीयान्तो न भवति ।

उदा० [कृतं] बळित्था देव निष्कृतमादित्या । [उत] उतादित्या दिव्या पार्थिवस्य [आशाते] ज्योतिष्मत् क्षत्रमाशाते आदित्या ॥

आयुधा इंग्यान्तः ॥

विभागवत्पदं इंग्यमित्युच्यते । इंग्यस्य अन्तः इंग्यान्तः तथाभूतः आयुधा इति शब्दो विसर्गान्तो भवति ॥

उदा० तिग्मायुधा रक्षसे हन्तवा उ । इंग्यान्त इति किं? क्षेत्रादपश्यमायुधामिमानम् इत्यत्र न ॥

इच्छमाना, इन्वा, इतरा, इधाना इष्टाः ॥

एतानि पदानि विसर्गान्तानि भवन्ति ॥

उदा० (इच्छमानाः) त्वया सह द्रविणमिच्छमानाः । (इन्वाः) देवीर्द्वारो बृहतीर्विश्वमिन्वाः । (इतराः) अग्न इत्थेतरा गिरः । (इधानाः) ये अग्नयो न शोशुचन्निधानाः (इष्टाः) इष्टाः होत्रा असृक्षत ॥

इषिरा दुस्पार्हाःपरः ॥

दुः, स्पार्हाः इत्येवंपर इषिराशब्दो विसर्गान्तो भवति ॥

उदा० (दुः) ऋतावान इषिरा दूळभासः। (स्पार्हाः) इषिराः स्पार्हाः सुवर्णा अनवद्यरूपाः। दुःस्पार्हाःपर इति किं? बोधिन्मनसा-रथ्येषिरा ॥

प्रेषिता वीरा इयानाः ॥

प्रपूर्व इषिताशब्दः, वीराइयाना शब्दश्च विसर्जनीयान्तो भवति ॥

उदा० (प्रइषिता) देवापिना प्रेषितामृक्षिणीषु। (वीरा) तुभ्यं गिरो विप्रवीरा इयानाः। एवंपूर्व इति किं? सत्रेह जाता विषिता नमोभिः। मितज्ञुभिर्नमस्यैरियाना इत्यत्र न ॥

धाना, रुद्राय, विशो, बृहस्पतेः हित्वां हित्वा, जरित्रे, या, वां, गिरो, वाजयन्, नारीः, गावो विश्वाःपर इमाः ॥

धानादिपर इमाशब्दो विसर्गान्तो भवति।

उदा० (धानाः) इमा धाना घृतस्नुवः। (रुद्राय) इमा रुद्राय तवसे कपर्दिने। (विशः) शोचिष्केशं वृषणं यमिमाविशः। (बृहस्पतेः) मृगाणां न हेतयो यन्ति चेमा बृहस्पतेः। (हित्वां) इमा हित्वामूर्जां वर्धयन्ति। (हित्वा) इमा हित्वा मतयस्तोमतष्टाः। हित्वां हित्वेति किं? [इमा हि वां गोऋजीका मधूनि] (जरित्रे) अचेतयद्धिय इमा जरित्रे। (याः) इमा या गावः सजनाः सुदुघाः। (वां) अमूरा विश्वा वृषणा-विमावाम्। (गिरः) इमा गिर आदित्येभ्यो घृतस्नूः। (वाजयन्) यदि-मा वाजयन्नहम्। (नारीः) इमा नारीरविधवाः सुपत्नीः। (गावः) इमा

गावः सरमेया ऐच्छ. । (विश्वाः) अधेमा विश्वाः पृतना जयासि । धाना आदिपर इति किं? इमा ब्रह्मब्रह्मवाहः इत्यत्र न । यत्रेमा विश्वा भुवनानि तस्थुः ॥

हनूपूर्वश्च ॥

चकारः इमा इत्यस्य आकर्षकः । हनूपूर्व इमा इति पदरूपः शब्दो विसर्जनीयान्तो भवति । परावतश्च वृत्रहन् । इमा जुषस्व नो गिरः । हनूपूर्व इति किं? क्रियन्ते अनतिद्रुता । इमा जुषस्व हर्यश्च ॥

ईराणा ईषमाणा न ईशानाः ॥

एतानि पदानि विसर्गान्तानि भवन्ति ॥

उदा० (ईराणाः) उदीराणा यज्ञमुपप्रयन्तः । (ईषमाणाः) वृत्रस्य त्वा श्वसथादीषमाणाः । (नः ईशानाः) आपो जनयथा च नः । ईशाना वार्याणाम् । न इति किं? युवां क्षेमस्य प्रसवे मितज्ञवः । ईशानावस्वः इत्यत्र न ॥

उषा उस्रिया उखाया उक्षमाणा उक्षिता उर्वश्या उहानाः ॥

एतानि पदानि विसर्गान्तानि भवन्ति ।

उदा० (उषाः) कृष्णेभिरक्तोषा रुशद्भिः । (उस्रियाः) आप्यायंतामुस्रियाः । (उखायाः) यन्नीक्षणं मांस्पचन्या उखायाः । (उक्षमाणाः) अहमपो अपिन्वमुक्षमाणाः । (उक्षिताः) साकं जाताः सुभ्वः साकमुक्षिताः । (उर्वश्याः) उर्वश्या ब्रह्मन्मनसोधिजातः । (उहानाः) इन्द्राग्न्योरनुव्रतमुहानाः ॥

पीतये नश्चिद्यच्छतूग्राः ॥

पीतये, नः चित्, यच्छतु, एतेषु पूर्वेषु सत्सु उग्रा इति पदं विसर्गान्तं भवति ॥

उदा० (पीतये) देवान् हवामहे मरुतः सोमपीतये। उग्राहि । [नः] यूयं न उग्रा मरुतः (चित्) वनाचिदुग्रा जिहते । (यच्छतु) इन्द्रो वः शर्म यच्छतु । उग्रावः । एवंपूर्व इति किं? अथोह क्षत्रमधिधत्थ उग्रा ॥

चितयन्तेक्षपोवस्तइदुस्राः ॥

चितयन्ते, क्षपः, वस्ते, इत्, एवंपूर्व उस्रा इति विसर्जनीयान्तो भवति ॥

उदा० (चितयन्ते) ये नमानासश्चितयन्त उस्राः । (क्षपः) क्षप उस्रा वरिवस्यन्तु देवाः । (वस्ते) योहस्य वां रथिरावस्त उस्राः । (इत्) विश्वा इदुस्रास्पळुरेति सूर्यः । एवंपूर्व इति किं? या सद्य उस्राव्युषिज्मो अन्तान् इत्यत्र न ॥

ऊमा ऊता ऊर्णाः ॥

एते विसर्गान्ता भवन्ति ॥

उदा० (ऊमाः) ऊमा वाये सुहवासो यजत्राः । (ऊताः) वयमग्ने वनुयामत्वोताः । (ऊर्णाः) ऊर्णा वसानशुन्ध्यवः ॥

ऊर्ध्वा नद्योभवन्तिपरः ॥

नद्यः भवन्ति इत्येवंपरः ऊर्ध्वा इति विसर्जनीयान्तो भवति ॥

उदा० (ऊर्ध्वा) वेषन्तीरूर्ध्वानद्यो न आगुः । (भवन्ति) ऊर्ध्वा भवन्ति दर्शतायजत्राः । एवंपर इति किं? ऊर्ध्वाधीतिः प्रत्यस्य प्रयामनि इत्यत्र न ॥

ऋक्षा , ऋभुक्षा , ऋष्वाः ॥

एतानि पदानि विसर्जनीयान्तानि भवन्ति ॥

उदा० (ऋक्षा) अमीय ऋक्षा निहितास उच्चा । (ऋभुक्षा) इन्द्र ऋभुक्षा मरुतः परिख्यन् । (ऋष्वाः) अज्रा इन्द्रस्य गिरयश्चिदृष्वाः ॥

ऋज्रावातपरः ॥

वातपर ऋज्रा इति विसर्गान्तो भवति ॥

उदा० य ऋज्रा वात'हसः । वातपर इति किं? स्यू मन्यू ऋज्रा वातस्याश्वा ॥

एकस्या एवाः ॥

एतौ विसर्गान्तौ भवतः । एकस्या वस्तोरावतम् रणाय । दुर्मायवो दुरेवा मर्त्यासः ॥

क्षम्यहमिन्मह्यमेताः

क्षमि, अहं, इत्, मह्यं, इत्येवंपूर्व एता इति विसर्जनीयान्तो भवति ॥

उदा० (क्षमि) अधिक्षमि । एता जुषत मे गिरः । (अहं) अहमेता मनवे विश्वश्चन्द्राः । (इत्) तुभ्येदेतायासु मन्दसानः । (मह्यं) प्रजापतिर्मह्यमेता रराणः ॥

वि न नि परश्च ॥

व्यादीनां द्वन्द्वं कृत्वा पश्चात् पूर्ववत् बहुव्रीहिः । चकारः पूर्वसूत्रात् एता इति पदमाकर्षयति । व्यादिवंपरः एता इति पदरूपः शब्दः विसर्गान्तो भवति ॥

उदा० (वि) एता विपृच्छ किमिदं भनन्ति। (न) एतानया मे अगृभीत शोचिषः। (नि) पुनरेता निवर्तन्ताम्। क्षम्यादिपूर्वो व्यादिपर इति किं? न किष्ट एता व्रतामिनन्ति ॥

एना अनन्तोदात्तः ॥

अन्ते उदात्तो यस्य सः अन्तोदात्तः। अन्तोदात्तो न भवतीत्यनन्तोदात्तः। तथाभूतः एना इति शब्दो विसर्जनीयान्तो भवति। त्वं पुर इन्द्र चिकिदेना व्योजसा। अनन्तोदात्त इति किं? एना ह्यस्योदरे इत्यत्र न ॥

ओजा ओकाः ॥

एते विसर्जनीयान्ते भवतः ॥

उदा० त्वं हिमन्यो अभिभूत्योजाः। स यो वृषा वृष्ण्येभिः समोकाः ॥

अव०—इति स्वराद्यनुक्रमं परिसमाप्य इदानीं स्वरादीनां व्यञ्जनादीनाञ्च साधारणलक्षणं दर्शयितुमाह ऐभिरित्यादिना—

ऐभिर्जघन्वान् द्यौर्वः संवत्सरं गोमायुः अत्याहि सूर्यस्येव सुष्वाणा सोवि, मृज्यमानः क्राणारुद्रा उपब्रह्माण्येतेषु सर्वत्र ॥

एतेषु वर्गेषु विद्यमानानि पदानि विसर्जनीयान्तानि भवन्ति ॥

उदा० (ऐभिरित्यत्र) मत्सरा मादयिष्णवः। घृतपृष्ठा मनोयुजः। (जघन्वानित्यत्र) त्वया शूर्ता वहमाना अपत्यम्। दानुचित्रानि दुर्योणे। सीरानस्रवन्तीः। (द्यौर्व इत्यत्र) ये अंस्या ये अंगयाः। (संवत्सरं इत्यत्र) संवत्सरं शशयानाः। (गोमायुरित्यत्र) आविर्भवन्ति गुह्या न केचित्। तप्ता घर्मा अश्नुवते विसर्गम्। गवां मण्डूका ददतः शतानि।

(अत्याहि इत्यत्र) अत्याहियाना न हेतृभिः । (सूर्यस्येवेत्यत्र) वृषच्युता मदासः । दिवो मूर्धानः प्रस्थिता वयस्कृतः । (सुष्वाणा सोऽयद्रिभिः) सूर्यासो न दर्शता सोजिगाल्वयः । [मृज्यमानः] मरुत्वन्तो मत्सरा इन्द्रिया हयाः । (क्राणा रुद्रा) मरुतो विश्वकृष्टयः । दिवः सिषक्ति स्वयशा निकामभिः । (उपब्रह्माणि) इन्द्रं नमस्या जरितुः पनन्त । सप्तापो देवीः सुरणा अमृक्षाः । नवतिं स्रोत्या नव च स्रवन्तीः ॥

न आ त्वा नमसा वृषा त्रा वा ॥

अतिप्रसक्तस्य अपवादमाह — आ, त्वा, नमसा, वृषा, त्रा, वा, एतानि पदानि विसर्जनीयान्तानि न भवन्ति ॥

उदा० (आ) देवेभिरग्न आगहि । (त्वा) ये त्वा वहन्ति वह्नयः । (नमसा) क्षयद्वीराय नमसादिदिष्टन । (वृषा) कनिक्रदद्वृषा हरिः । (त्रा) पुरुत्रा वाचं पिपिसुर्वदन्तः । (वा) मघवा दानु चित्रः ॥

अवग्रहश्च नित्यम् ॥

नेत्यनुवर्तते । अवग्रहश्चेत्ययं प्रतिषेधः अनन्तरमात्रविषयो न भवति, नित्यग्रहणस्य सर्वप्रतिषेधकत्वात् । अतः अत्र च अन्यत्र च विषयभूतोऽवग्रहो विसर्जनीयान्तो न भवति । हृतिं सुराधतो गृहे । प्रावृषि आगतायाम् । द्यौर्नोमायुरिति प्राप्तेः । प्रजावान् । दीर्घः । प्रजावन्तः । अनमीवाः । प्रजाः प्रा इति प्राप्तेः । पृतना-हवेषु । पृतनाः पर्वताः इति प्राप्तेः । नित्यग्रहणं लक्षणान्तरप्राप्तस्यापि प्रतिषेधार्थम् । इतरथा उत्तरस्य विधिर्वा भवति प्रतिषेधो वेति अनन्तरा या प्राप्तिः तस्या एव प्रतिषेधः स्यात् । न विदेशस्थाया अपि प्रतिषेधः । एवं च एष नित्यो भवति यदि विदेशस्थाया अपि भवति, नान्यथा । तस्मात् प्रजावानित्यादौ प्रजाः प्रा इत्यादिका या प्राप्तिः सा सर्वा प्रतिषिध्यते ॥

अ०—अस्य प्रतिषेधस्य कुत्रचिदपवादमाह—

नव्या स्था इति वर्जयित्वा ॥

नव्या, स्था इत्यवग्रहौ विसर्गान्तौ भवतः ॥

उदा० नव्या नव्या युवतयो भवन्तीः । स्था रश्मानो हिरण्यया । अवग्रहश्चेत्यत्र चशब्दोऽनन्तरानुकर्षणार्थः । तेन च अनुकृष्टत्वात् उत्तरत्र अनुकर्षणं न भवति ॥

स्थु स्थ भवन्तु परः ॥

नेति निवृत्तम् । स्थुः, स्थ, भवन्तु एतेषु परेषु विषयभूताः शब्दाः विसर्जनीयान्ता भवन्ति ॥

उदा० (स्थु) नीचीनास्तुरुपरि । (स्थ) अजरास्थाम विष्णवः । (भवन्तु) शिवा देवीरशिपदा भवन्तु । सर्वा नद्यो अशिमिदा भवन्तु । स्थुरित्यादिवाक्यस्य विधिप्रकरणं विहाय प्रतिषेधप्रकरणपाठः सामान्यविधित्वज्ञापनार्थः । विधिप्रकरणपाठेऽपि तत्तत्प्रवृत्तवर्णादिशब्दपदमात्रविषयो वा सामान्येन सर्वविषयो वेति सन्देहः स्यात् । तस्मात् सर्वविषयज्ञापनार्थं इह पठितम् ॥

अव०—अकारादिप्रकरणं परिसमाप्य कवर्गादिप्रकरणं आरभ्यते—

किरणाः, क्रीळाः, केताः, कुन्याः, कुमाराः, कनायाः, काष्ठायाः ॥

एते शब्दा विसर्गान्ता भवन्ति ॥

उदा० (किरणाः) भियाहह्लासः किरणाः । (क्रीळाः) क्रीळन्ति क्रीळा विदथेषु धृष्वयः । (केताः) अज्ञातकेता वृजिना अभूवन् ।

(कुल्याः) स्यन्दन्तां कुल्या विषिताः पुरस्तात् । (कुमाराः) कुमारा विशिखा इव । (कनायाः) पुनस्तदा वृहति यत् कनायाः । (काष्ठायाः) काष्ठाया मध्ये दुघणं शयानम् ॥

दक्षिणतस्कपर्दाः, एषां कशाः सोमः कृताः, वाजी काष्ठाः, सत्यं, क्षेमं, कृण्वानाः ॥

दक्षिणत आदिकेषु कपर्दाऽऽदिकेषु पदेषु विसर्जनीयो विद्यते ॥

उदा० (दक्षिणतस्कपर्दाः) श्वित्यञ्चो मा दक्षिणतस्कपर्दाः । (एषां कशाः) इहेव शृण्व एषां कशाः । (सोमः कृताः) स्तीर्णं ते बर्हिः सुत इन्द्रसोमः कृताः । (वाजी काष्ठाः) घृतस्य धारा अरुषो न वाजी काष्ठाः । (सत्यं) राजानः सत्यं कृण्वानाः । (क्षेमं) क्षेमं कृण्वाना जनयः । दक्षिणतादयः पूर्वेष्विति किं ? चतुष्कपर्दा युवतिः सुपेशाः । यावां कशा मधुमती । ब्रह्मकृता मारुतेनागणेन । उर्वी काष्ठा हितं धनम् । आविष्कृण्वाना महिमानमागात् । एषु विसर्गो न भवति ॥

कामाः ॥

अयं विसर्गान्तो भवति । उदा० यत्र कामा निकामाश्च ॥

न देवपूर्वः ॥

देवपूर्वः कामा इति पदरूपः शब्दो विसर्गान्तो न भवति । उदा० देवकामा स्योना ॥

क्षाः, क्षयाः, व्रता क्षत्रियाः ॥

एते विसर्जनीयान्ता भवन्ति । उदा० (क्षाः) क्षानभीषा अद्रिवः । (क्षयाः) तं त्वा गीर्भिरुरुक्षयाः । व्रता क्षत्रियाः । धृव्रता क्षत्रिया यज्ञनिष्कृतः । व्रता इति किं ? सिन्धुपत्नी क्षत्रियायातमर्वाक् इत्यत्र न ॥

गणा, गोतमा, गर्भा, ग्रामा, गृभ्णा, गूर्ता, ग्रा, ग्वा, गृभीता, गभीरा, नोगुह्याः ॥

एतानि पदानि विसर्गान्तानि भवन्ति । उदा० (गणाः) इन्द्रज्येष्ठा मरुद्गणाः । (गोतमाः) अभित्वा गोतमा गिरा । (गर्भाः) सप्तार्धगर्भा भुवनस्य रेतः । (ग्रामाः) यस्य ग्रामा यस्य विश्वे । (गृभ्णाः) यत्संगृभ्णा मघवन् काशिरित्ते ॥ (गूर्ताः) पूर्वीरुषसः शरदश्च गूर्ताः । (ग्राः) उत्ग्रा ब्यन्तु देवपत्नीः । (ग्वाः) तु विग्रक्षासो दिव्या नवग्वाः । (गृभीताः) आमिषि गृभीता बाह्वोर्गवि । (गभीराः) यस्य नूना गभीराः । (नोगुह्याः) मानो गुह्यारिप आयोरहन् दभन् । न इति किं ? निषीमिदत्र गुह्या दधानाः इत्यत्र न ॥

गाः ॥

अयं विसर्गान्तो भवति । उदा० उद्गा हरिभिराजत ॥

न दुःसुपूर्वः ॥

दुःसु, इत्येवंपूर्वो गा इति विसर्गान्तो न भवति । उदा० (दुः) विदुर्गा विद्विषः पुरः । (सु)सुगानः कर्त सुपथा स्वस्तये ॥

गोपाः ॥

अयं विसर्गान्तो भवति । उदा० यं सुगोपारक्षसि ब्रह्मणस्पते ॥

न मिथुना, स्यातं, मासो, देवा परः ॥

मिथुना, स्यातं, मासः देवा इत्येवंपरो गोपा इति विसर्गान्तो न भवति । उदा० (मिथुना) अभूतं गोपा मिथुना शुभस्पती । (स्यातं) तानो वसू सुगोपा स्यातम् । (मासः) उशंता दूता नदभाय गोपा मासः । (देवा)ता वां विश्वस्य गोपा देवा ॥

गृणाना श्रवसेदेवपरः ॥

श्रवसे, देव, इत्येवंपरो गृणाना इति विसर्गान्तो भवति । उदा० (श्रवसे)गृणाना श्रवसे । (देव) गृणाना देव वीतये । एवंपर इति किं? गृणाना यथा पिबाथो अन्धः इत्यत्र न ॥

नुदन्तघोराः ॥

नुदन्तपूर्वो घोरा इति विसर्गान्तो भवति । उदा० न रोदसी अपनुदन्त घोराः । नुदन्तपूर्व इति किं? प्रयामही महान्ता जायमाना घोरा इत्यत्र न ॥

चन्द्रमाश्चेताश्चक्षाश्चक्राणाश्चक्षाणामतौ च निष्ठाः ॥

एतानि पदानि विसर्गान्तानि भवन्ति । उदा० (चन्द्रमाः) विचाकशच्चन्द्रमाः । (चेताः) पाकाय गृत्सो अमृतो विचेताः । (चक्षाः) नृचक्षा देववीतये । (चक्राणाः) चक्राणा वृष्णिपौंस्यम् । (चक्षाणाः) चक्षाणा यत्र सुविताय देवाः । (मतौ च निष्ठाः) अयन्ते अस्यां सुमतौ च निष्ठाः । मताविति किं? सा ते अग्ने शन्तमा चनिष्ठा इत्यत्र न ॥

चित्रारोधस्वतीर्यामेभिःपरः ॥

रोधस्वतीः,यामेभिः इत्येवंपरः चित्रा इति विसर्गान्तो भवति । उदा० (रोधस्वतीः)चित्रा रोधस्वतीरनु । (यामेभिः)चित्रा यामेभिरीरते । एवंपर इति किं? अचेति चित्रा ॥

अश्वापश्चन्द्राः ॥

अश्व, अपः इत्येवंपूर्वः चन्द्रा इति विसर्गान्तो भवति । उदा० (अश्व) सगोमधा जरिते अश्वश्चन्द्राः । (अपः) यश्चापश्चन्द्रा बृहतीर्जजान । अश्वापःपूर्व इति किं? व्यु १ षाश्चन्द्रा ॥

रिशादसःपरश्च ॥

चशब्दश्चन्द्रा इत्यादिशति । रिशादसःपरः चन्द्रा इति विसर्गान्तो भवति । उदा० पुरुश्चन्द्रा रिशादसः । रिशादसःपर इति किं ? पुरुश्चन्द्रा नासत्या इत्यत्र न ॥

चक्रमाणा रिहन्तिपरः ॥

रिहन्तिपरश्चक्रमाणा विसर्गान्तो भवति । उदा० ऋतस्य सानावधि चक्रमाणा रिहन्ति । रिहन्तिपर इति किं ? ता यज्ञमाशुचिभिश्चक्रमाणा ॥

छिन्नाः ॥

अयं विसर्गान्तो भवति । उदा० परिच्छिन्ना भरता अर्भकासः ॥

जुष्टा, जोषा, जुगुर्या, ज्ञेया, जज्ञाना, ज्याया, जुह्वाना, जीवा, ज्या, जेहमाना, ज्ञा, जिह्वाया, जा जोहुवाना, इन्द्रज्येष्ठाः ॥

एतानि पदानि विसर्गान्तानि भवन्ति । उदा० (जुष्टाः) उतत्ये माध्वन्यस्य जुष्टाः । सजोषाम्नास्पत्नीभिः । (जुगुर्या) अभीनो अग्न उक्थमिज्जुगुर्याः । (ज्ञेयाः) ज्ञेया भागं सहसानोवरेण । (जज्ञानाः) शर्धो जज्ञाना यातास्थाः (ज्याया:) ज्याया हेतिं परिबाधमानः । (जुह्वानाः) आजुह्वाना घृतपृष्ठं पृषध्वत् । (जीवाः) जीवा ज्योतिरशीमहि । (ज्याः) परमज्या मघस्य मेध्यातिथे । (जेहमानाः) येता तृषुर्देवत्रा जेहमानाः । (ज्ञाः) एवाकविस्तुवीरवां ऋतज्ञाः । (जिह्वायाः) जिह्वाया विवृहामि ते । (जाः) अभिवीरो अभिसत्वा सहोजाः । (जोहुवानाः) इन्द्रस्येवरातिमाजोहुवानाः । (इन्द्रज्येष्ठाः) इन्द्रज्येष्ठाः मरुद्गणाः । इन्द्रेति किं ? अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा ॥

अग्नि, न, सु, जिह्वाः ॥

अग्नि, न, सु, इत्येवंपूर्वो जिह्वा इति विसर्गान्तो भवति । उदा० (अग्नि) अग्निजिह्वा मनवः । (न) अग्नीनां नजिह्वा विरोकिणः । (सु) मन्द्राः सुजिह्वः स्वरिनार आसभिः । अग्निनस्विति किं? मन्द्रजिह्वा जुगुर्वणी ॥

जनाः ॥

अयं विसर्गान्तो भवति । उदा० उतस्मास्य पनयन्ति जनाः ॥

न द्वापूर्वः ॥

द्वापूर्वो जना इति विसर्गान्तो न भवति । उदा० द्वाजनायात-यन्नन्तरीयते ॥

मरुतो, युगा, गोभिर्देवेभ्यो, महिना परोजाताः ॥

मरुतः, युगा गोभिः, देवेभ्यः, महिना इत्येवंपरो जाताः इति विसर्गान्तो भवति । उदा० (मरुतः) तद्वः सुजाता मरुतः । (युगा) वच्यन्ते वां ककुहा अप्सु जाता युगा । (गोभिः) इमा अग्ने मतयस्तुभ्यं जाता गोभिः । (देवेभ्यः) या ओषधीः पूर्वा जाता देवेभ्यः । (महिना) प्रये जाता महिना । एवंपर इति किं? वपूंषि जाता मिथुना सचेते इत्यत्र न ॥

जुषाणा युयंपरः ॥

यूयंपरो जुषाणा इति विसर्गान्तो भवति । उदा० उपेमायात मनसा जुषाणा यूयम् । यूयम्पर इति किं? मन्द्रा हिरण्यवर्तनी जुषाणा वाजिनी वसू इत्यत्र न ॥

तिष्ठा, स्तृषा, स्तुस्तुवाना स्तन्वाना, स्तस्थाना, वरुणस्तुराः ॥

एते विसर्जनीयान्ता भवन्ति। उदा० (तिष्ठाः) यदूर्ध्वस्तिष्ठा द्रविणेह धत्तात्। (तृप्ताः) तृप्ता यात पथिभिर्देवयानैः। (तुस्तुवानाः) इन्द्रो अग्निरश्विना तुष्टुवानाः। (तन्वानाः) तन्वाना यज्ञमानुषग्यदञ्जते। (तस्थानाः) सन्तस्थाना विह्वयन्ते समीके। (वरुणस्तुराः) आवर्हिरिन्द्रो वरुणस्तुरा नरः। वरुण इति किं? मिथस्तुरा विचरन्ती पावके इत्यत्र न॥

मातृदीर्घसुकृत्तमाः॥

मातृदीर्घसुकृत् इत्येवंपूर्वः तमा इति विसर्गान्तो भवति। उदा० (मातृ) मातृतमा दासायदीम्। (दीर्घ) ऋषी यद्वां दीर्घतमा जुहाव। (सुकृत्) सुकृत्तमा मधुनो भक्षमाशत। एवंपूर्व इति किं? इन्द्रतमाहि विष्ण्या मरुत्तमा॥

येगिरःपरश्च॥

चकारः "तमा" इति पदसूचकः। ये, गिरः इत्येवंपरः तमा इति विसर्गान्तो भवति। उदा० (ये) केष्ठा नरः श्रेष्ठतमा ये। (गिरः) उदुत्ये मधुमत्तमा गिरः। येगिरःपर इति किं? प्रशन्तमा वरुणं दीधिती गीः इत्यत्र न॥

ततः॥

अयं विसर्जनीयान्तो भवति। उदा० शीप्राः शीर्षंसुविता हिरण्ययीः॥

न वसानंपरः॥

सान्निध्यात् तता इति लभ्यते। वसानंपरः तता इति विसर्गान्तो न भवति। उदा० अनवपृक्णा वितता वसानम्॥

त्या हरितोबृहतीःपरः॥

हरितः बृहतीः, इत्येवंपरः त्या इति विसर्गान्तो भवति । उदा० (हरितः) उतत्या हरितो दश । (बृहतीः) अवत्या बृहतीरिषः । एवं पर इति किं? उतत्या मे यशसाश्वेतनायै इत्यत्र न ॥

अस्मान् स्वम्बयः, सुरुक्मेहि, तोकेहिते, वायो शुक्रः, क्वस्वित्, सम्यक्, हयोना, गाव, एषास्यान, आपोहि, मध्यायत्, यदिमाभिगोत्राण्येतेषु ताः ॥

एतेषु वर्गेषु विद्यमानानि "ता" इति पदानि विसर्जनीयान्तानि भवन्ति । उदा० (अस्मान्सु इत्यत्र) इन्द्रता रथिनीरिषः । (अम्बय इत्यत्र) तानोहिन्वंत्वध्वरम् । (सुरुक्मे हीत्यत्र) तानश्वोदयत श्रिये । (तोके हितइत्यत्र) ता वाँ घियो वसे वाजयन्तीः । (वायो शुक्र इत्यत्र) अस्मे ता यज्ञवासा । (क्वस्विदित्यत्र) ताधाता भद्रा उषसः पुरासुः । [सम्यक् इत्यत्र] ता जुषाणो हर्यति जातवेदाः । [हयो न इत्यत्र] ता नो देवीः सुभगाः शर्म यच्छत । [आगाव इत्यत्र] न तानशन्ति नदभाति तस्करः । [एषा स्थान इत्यत्र] विता बाधन्ते तम ऊर्म्यायाः । [आपो हि इत्यत्र] ता न ऊर्जे दधातन । [मध्यायत् इत्यत्र] नतानुमे पृशन्यो जगृभ्रे । [यदि मा इत्यत्र] तानो मुञ्चत्वंहसः [अभिगोत्राणि इत्यत्र] अस्माकं या इषवस्ता जयन्तु । एतेष्विति किं? ता यज्ञमा शुचिभिश्चक्रमाणा ॥

नः कणूकपरश्च ॥

चकारनिर्देशात् पूर्वसूत्रस्थः ता इति शब्दः अनुवर्तते । नः कणूक, इत्येवं परः ता इति विसर्गान्तो भवति । उदा० तानः कणूकयन्तीः । नः कणूक इति किं? तानो वसू सुगोपास्यातम् ॥

द्रप्सा, दध्या, दमूना, दत्ता, दिष्टा, दीना, दुग्धा, दस्मा, दुध्रा, दग्धा, देष्णा, अयनेदुर्वाः ॥

एते विसर्गान्ता भवन्ति । उदा० [द्रप्साः] आनो द्रप्सा मधुमन्तो विशन्तु । [दध्याः] पश्चासदध्यायो अघस्य दाता । [दमूनाः] अध्वर्यं रिषितो दमूनाः । [दत्ताः] उपमाश्यावास्वनयेन दत्ताः । [दिष्टाः] दिशः सूर्यो नमिनाति प्रदिष्टाः । [दीनाः] दीना दक्षा विदुहन्ति प्रवाणं [दुग्धाः] तुभ्यं खाता अवता अद्रि दुग्धाः । (दस्माः) ब्रवाम दस्मा वार्यं दधानाः । [दुध्राः] नयं दुध्रा वरन्तेन स्थिरामुरः । [दग्धा] ये अग्नि दग्धाः ये अनग्नि दग्धाः । [देष्णाः] कुमार देष्णा जयतः पुनर्हणः । [अयने दूर्वाः] अयने ते परायणे दूर्वाः अयन इति किं ? पाक दूर्वा व्यल्कशा ॥

दधानाः ॥

अयं विसर्गान्तो भवति । उदा० भियं दधाना हृदयेषु शत्रवः ॥

न यूयं, नि, यां, गूड्वीपरः ॥

यूयं, नि यां, गूड्वी इत्येवंपरो दधाना इति विसर्गान्तो न भवति । उदा० [यूयं] दीर्घश्रुतं रयिमस्मे दधाना यूयम् । [नि] पुरूवपार्श्यश्विना दधानानि । [यां] सापक्ष्या३ नव्यमायुर्दधानायाम् । [गूड्वी] एषास्या नव्यमायुर्दधाना गूड्वी ॥

दाः ॥

अयं विसर्गान्तो भवति । उदा० द्रविणोदा द्रविणसस्तुरस्य ॥

नवाजपूर्वः ॥

वाजपूर्वो दा इति विसर्गान्तो न भवति । उदा० युवं मदाय वाजदा युवम् ॥

यन्, गिरयश्च, दृह्लाः ॥

यन्, गिरयश्च, इत्येवंपूर्वो दृह्ला इति विसर्गान्तो भवति । उदा० (यन्) सखीभिः सखीयन् दृह्ला रुरोज । (गिरयश्च) अस्येदुभिया गिरयश्च दृह्लाः । एवंपूर्व इति किम्? न्याविध्यदिलीबिसस्य दृह्ला ॥

तमा दासाः, शश्रमाणा दोषाः, भवन्ति दर्शताः, प्र, यासि दुच्छुनाः, घृतं दुहानाः, हूतिर्दैव्याः ॥

तमापूर्वकाः दासादयः विसर्गान्ता भवन्ति । उदा० (तमा दासाः) मातृतमा दासा यदीम् । (शश्रमाणा दोषाः) पूर्वीरहं शरदः शश्रमाणा दोषाः । (भवन्ति दर्शताः) ऊर्वा भवन्ति दर्शताः) (प्र दुच्छुनाः) प्रदुच्छुना मिनवाम वरीयः । (यासि दुच्छुनाः) वेषी रायो वियासि दुच्छुनाः । (घृतं दुहानाः) घृतं दुहाना विश्वतः । (हूतिर्दैव्या) मयि देवहूतिः । दैव्या होतारो वनुषन्त । तमादयः पूर्व इति किं? त्वन्तान् इन्द्रो भयान् अमित्रान् । न विष्ठदोषावस्तोर्हवमानासः । एषा जनं दर्शता बोधयन्ती । स्वातं मर्मर्तु दुच्छुनाहरस्वती । बृहद्दिवेषु मानुषा । दुहाना धेनुर्व्रजनेषु कारवे । आदैव्या वृणीमहे वांसि ॥

दुघाः ॥

अयं विसर्गान्तो भवति । उदा० अश्म व्रजाः सुदुघा वव्रे अन्तः ॥

न विश्वा, जात, यस्य परः ॥

विश्वा, जात, यस्य, इत्येवंपरः दुधा इति विसर्गान्तो न भवति ।

उदा० (विश्वा) तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि । (जात) त्वे धेनुः सुदुघा जातवेदः । (यस्य) स्व आदमे सुदुघा यस्य धेनुः ॥

दक्षा विनपरः ॥

वि, न, इत्येवंपरो दक्षा इति विसर्गान्तो भवति। उदा० (वि) दीना दक्षा विदुहन्ति प्रवाणम् । (न) यत्पाकत्रा मनसा दीनदक्षान । एवंपर इति किं? अतूर्त दक्षा वृषणा वृषण्वसू ॥

दिव्या, नव, न, परः ॥

नव न इत्येवंपरो दिव्या इति विसर्गान्तो भवति । उदा० (नव) तुविम्रक्षासो दिव्या नवग्वाः । (न) दिव्या न कोशासो अभ्रवर्षाः । नव नपरेति किं ? अनभिशस्ता दिव्या यथा विट् ॥

दानाः स्मत्परः ॥

स्मत्परो दाना इति विसर्गान्तो भवति । उदा० पैजवनस्य दानाः स्मद्दिष्टयः । स्मत्पर इति किं ? दानामह्वा तदेषाम् ॥

दीध्यानाः ॥

अयं विसर्गान्तो भवति । उदा० ते सत्येन मनसा दीध्यानाः ॥

न प्रपूर्वः ॥

सान्निध्यात् दीध्याना इति लभ्यते । उदा० प्रदीध्याना जोषमन्याभिरेति ॥

दुष्टरा यस्परः ॥

यस्परो दुष्टरा विसर्गान्तो भवति । उदा० दुष्टरा यस्य प्रवणेनोर्मयः । यस्पर इति किं ? या पृतना सुदुष्टरा ॥

देवाः ॥

अयं विसर्गान्तो भवति । कृण्वतो वो वरुणमित्रदेवाः ॥

नोभापूर्वः ॥

उभापूर्वो देवा इति विसर्गान्तो न भवति । उदा० उभा देवा नृचक्षसा ॥

एषो उषा, अश्विनावर्तिः, तावां, इन्द्रा पर्वता, प्रवो मित्राय, कूष्ठः, प्रनु, यं युवं, इमा उवां, महे शुल्काय, ओत्यं, तावां, दस्राहि, इन्द्रसोममेतेषु देवा न ॥

एतेषु वर्गेषु विद्यमाना देवा इति विसर्गान्तो न भवति । उदा० (एषो उषा) घिया देवा वसुविदा । (अश्विनावर्तिः) एह देवा मयोभुवा (तावां) तावामद्य ताव परं हुवेम । श्रिये पूषन्निषुकृतेव देवा । (इन्द्रा पर्वता) वीतं हव्यान्यध्वरेषु देवा । (प्रवो मित्राय) देवा देवेषु प्रशस्ता । (कूष्ठो देवावश्विना) कुहत्या कुहनु श्रुता दिवि देवा । (प्रनुवोचासु तेषु) वयं देवा हवामहे । न देवा भसथश्च न । (यं युवं) दाश्वध्वराय देवा रयिम् । (इमा उवां दिविष्टयः) मक्षूयुभिर्नरा हयेभिरश्विना देवा । (महे शुल्काय) यस्य देवा गच्छथो वीथो अध्वरम् । (ओत्यमह्वे) देवा नमोभिरश्विना । (तावां) विश्वस्य गोपा देव । (दस्राहि) विश्वमानुषक् । देवा देवेभिरद्य सचनस्तमा । इन्द्रसोममिदं पिब । तानो देवा देवतया ॥

धृषितं, धारावरा, धीरा, धाया, न धेनाः ॥

एते विसर्गान्ता भवन्ति । उदा० (धृषिताः) हर्षमाणा धृषिता मरुतः । (धारावराः) धारावरा मरुतो धृष्ण्योजसः । (धीराः) यत्र धीरा मनसा वाचमक्रत । (धायाः) त्वमसि प्रदिवः कारुधायाः । (न धेनाः) त्वद्भावक्रेरध्यो३ न धेनाः । नेति किं? वायो तवप्रवती धेना इत्यत्र न ॥

धाः ॥

अयं विसर्गान्तो भवति । उदा० सास्म सुधा गोमदश्वावदुक्थ्यम् ॥

अनपपूर्वः ॥

अपपूर्वो धाना इति विसर्गान्तो न भवति । उदा० योगा उदाजदपधावलरय ॥

धानाः ॥

अयं विसर्गान्तो भवति । उदा० इमा धाना घृतस्नुवः ॥

न विपूर्वः ॥

विपूर्वो धाना इति विसर्गान्तो न भवति । उदा० यया विधाना विदधुर्ऋभूणाम् ॥

धाराः ॥

अयं विसर्गान्तो भवति । उदा० श्रोतन्ति धारा मधुनो घृतस्य ॥

न प्र च्युतःपूर्वः ॥

प्र च्युतः इत्येवं पूर्वो धारा इति विसर्गान्तो न भवति । उदा० (प्र) प्रधारामध्वो अग्नियः । (च्युतः) इन्दुरक्ष्येमदच्युतः धाराय ऊर्ध्वः ॥

घिष्ण्या येपरः ॥

येपरो घिष्ण्या इति विसर्गान्तो भवति । उदा० अच्छादेवान् ऊचिषे घिष्ण्या ये । येपर इति किं ? घियं जिन्वा घिष्ण्या विश्वलावसू इत्यत्र न ॥

नव्या, नवेदा, निदाया, नीळा, नग्ना, उन्नीताः, सुनीथाः, हस्ते नर्याः ॥

एते विसर्गान्ता भवन्ति । उदा० (नव्याः) नव्या नव्या युवतयो भवन्तीः । (नवेदाः) शुचि भ्राजा उषसो न वेदः । (निदायाः) स त्वं नो अर्वन्निदायाः । (नीळाः) कईव्यक्ता नरः सनीळाः । (नग्नाः) ऊधर्न नग्ना जरन्ते । (उन्नीनाः) दक्षा यदीमुन्नीना यशसा गवाम् । (सुनीथाः) आदित्या रुद्रा वसवः सुनीथाः । (हस्तेनर्याः) आयस्मिन् हस्ते नर्या मिमिक्षुः । उत्, सु, हस्तेपूर्व इति किं? भीमाज्ञया ब्राह्मणस्योपनीत । पुरुणीथा जातवेदो जरस्व । उभा शंसा नर्यामाविष्टाम् (एतेषु विसर्गो न)

नवा नःपरः ॥

नःपरो नवा इति विसर्गान्तो भवति । उदा० नवा नो अग्न आभर । नःपर इति किं? नवा मातृभ्यो वसाना जिहाति ॥

पतङ्गाः, पर्जन्याः, प्रजाः, प्राः, पापाः, पन्थाः, पुनानाः, पृश्न्याः, पृतनाः, पर्वताः, पाजाः, पार्याः, प्रयाः, प्रस्रवणाः, पवमानाः, पत्नायाः, पिन्वानाः, पूताः, पेशाः, प्रावेपाः, परस्याः, प्रसृताः, प्रशिष्टाः, प्रावृताः, अधःसपत्नाः, वरेण्यो रयीणाम्, प्रियाः, अस्य पादाः, इन्द्रस्य प्रेष्ठाः ॥

एते विसर्गान्ता भवन्ति । उदा० (पतङ्गाः) परिवामश्वा वपुषः पतङ्गाः । (पर्जन्याः) भूमिं पर्जन्या जिन्वन्ति । (प्रजाः) बहुप्रजा निर्ऋतिमाविवेश । (प्राः) अन्तरिक्ष प्रा भुवनेष्वर्पितः । (पापाः) पापा भद्रमुपजीवन्ति पत्नाः । (पन्थाः) सुप्रैतुः सूयवसो न पन्थाः । (पुनानाः) पुनाना यन्त्यनिविशमानाः । (पृश्न्याः) पृश्न्या यदूधरप्यापयो दुहुः । (पृतनाः) युवाभ्यां विश्वाः पृतना जयेम । (पर्वताः) न पर्वता न नद्यो वरन्तवः । (पाजाः) पृथुपाजा देवयद्भिः समिद्धः । (पार्याः) यत्पार्या युनजते धियस्ताः । (प्रयाः) प्रवावृजे सुप्रया बर्हिरेषाम् । (प्रस्रवणाः)

पुरः प्रस्रवणा बलिम्। (पवमानाः) पवमाना दिवस्परि। (पञ्चायाः) पञ्चाया गर्भ शृणु हि ब्रवीमि ते। (पिन्वानाः) पियः पिन्वाना स्वसरे न गावः। (पूताः) शुद्धाः पूता भवत यज्ञियासः। [पेशा] चन्द्रा वधूर्भवति यत्सुपेशाः। [प्रावेपाः] प्रावेपामबृहतो मादयन्ति। [परस्याः] यत्तेजामित्ववरं परस्याः। (प्रसूताः) इन्द्र प्रसूताः। [प्रशिष्टाः] वरुणप्रशिष्टा ये सूर्यस्य। [प्रावृताः] नीहारेण प्रावृता जल्प्या च। [अधः सपत्नाः] अधः सपत्ना मे पदोः। [वरेण्यः प्रियाः] होता मन्द्रो वरेण्यः। [रयीणां प्रियाः] आयेशमस्य संगथे रयीणां प्रियाः। वरेण्यो रयीणामिति किं? याते मन्म गृत्समदा ऋतावरिप्रिया इत्यत्र न। [अस्य पादाः] हिरण्यशृङ्गो यो अस्य पादाः। अस्य पूर्व इति किं? श्रिये ते पादादुव आमिमिक्षुः इत्यत्र न। [इन्द्रस्य प्रेष्ठाः] वयमद्येन्द्रस्य प्रेष्ठाः। इन्द्रस्येति किं? आयो अर्वाङ् नासत्या ववर्त प्रेष्ठा॥

ग्वा, जायेमहि, सोमा, यन्, भि, रवदन्, किल, प्रथमाः॥

एवंपूर्वैः प्रथमा इति विसर्गान्तो भवति। उदा० [ग्वा] ते दशग्वाः प्रथमा यज्ञमूहिरे। [जायेमहि] जायेमहि प्रथमा वेधसो नॄन्। [सोम] त्वे सोम प्रथमा वृक्तबर्हिषः [आयन्] पृथक् प्रायन् प्रथमा देवहूतय। [भि] वयं राजभिः प्रथमा धनानि। [अवदन्] तेवदन् प्रथमा ब्रह्म किलिबिषे। [किल] दूरं किल प्रथपा जग्मुरासाम्। एवंपूर्व इति किं? व्रता देवानां प्रथमा॥

धेनवः, पिन्वमानाः, जग्मिरे, रोदसी पथ्याः, सन्ति पुत्राः, माप्रपीताः, शतपवित्राः, ओषधीः, पूर्वाः॥

धेनवादिपूर्वाः पिन्वमानादयो विसर्गान्ता भवन्ति। उदा० (धेनवः

पिन्वमानाः) अस्थुरत्र धेनवः पिन्वमानाः । (जग्मिरे पथ्याः) संजग्मिरे पथ्या१ रायो अस्मिन् । (रोदसी पथ्याः) विरोदसी पथ्या याति साधन् (सन्ति पुत्राः) रुद्रस्य येमीह्लुषः सन्ति पुत्राः । (मापीताः) इमे मा पीता यशसः । (प्रपीताः) घृतं दुहाना विश्वतः प्रपीनाः । (शतपवित्राः) शतपवित्राः स्वधया मदन्तीः (ओषधीःपूर्वाः) । या ओषधीः पूर्वा जाता देवेभ्यः । एवमादिपूर्व इति किं ? मधोर्धारा पिन्वमाना दिवे दिवे । व्यू१षा आवः पथ्या ३ जनानाम् । बर्हिर्न आस्तामदितिः सुपुत्रा । अस्य पीता स्वर्विदः । सन्ती पवित्रा विततो न्येपि । मानुषाय क्षयाय । पूर्वा विश्वस्मादुभुवनाद्बोधि ॥

पार्थिवा येपरः ॥

येपरः पार्थिवा इति विसर्गान्तो भवति । उदा० ये वावृधन्त पार्थिवा ये । येपर इति किं ? आ प्रारजांसि दिव्यानि पार्थिवा इत्यत्र न ॥

पाः ॥

अयं विसर्गान्तो भवति । उदा० अधा न इन्द्र सोमपाः ॥

नाक्रविहस्ता, प्रमित्रयोः, यातमेतेषु ॥

एतेषु वर्गेषु विद्यमानाः पा इति शब्दः विसर्गान्तो न भवति । उदा० (अक्रविहस्ता) सुकृते परस्पा । (प्रमित्रयोः) तानस्तिपा तनूपा । (यातं) चर्दिष्पा उत नः परस्पा ॥

पृथिव्याः ॥

अयं विसर्गान्तो भवति । मूर्धानं दिवो अरतिं पृथिव्याः ॥

न को अस्य, इमाम्मे, वातस्येत्येतेषु ॥

एतेषु वर्गेषु पृथिव्या इति विसर्गान्तो न भवति । उदा० को अस्य वेद) दिवा पृथिव्या मिथुना सबन्धू । (इमां मे अग्ने समिधं जुषस्व)

पृथिव्या वा मात्रया । (वातस्य नु महिमान रथस्य) उतो एति पृथिव्या रेणुमस्यन् ॥

पर्णा नि, मधु, वाचंपरः ॥

एवंपरः पर्णा इति विसर्गान्तो भवति । उदा० (नि)यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते । (मधु) दिव्याः सुपर्णा मधुमन्त इन्दवः । (वाचं) सुपर्णा वाचमक्रतोपद्यवि । एवंपर इति किं? पर्णामृतस्य पतरोरिवारभे ॥

फालाः ॥

अयं विसर्जनीयान्तो भवति । उदा० शुनं नः फालाः ॥

बर्हा, ब्राह्मणा, बुबुधाना, बुधाना, बद्बधाना, बिभीषथाः ॥

एते विसर्गान्ता भवन्ति । उदा० (बर्हाः) । साम द्विबर्हा महि तिग्मभृष्टिः । (ब्राह्मणाः) तानि विदुर्ब्राह्मणा ये मनीषिणः । (बुबुधानाः) आदित्पश्चाद्बुबुधाना व्यख्यन् । (बुधानाः) ऋतस्य देवीः सदसो बुधानाः । (बद्बधानाः) यत्सीमनुग्मुचो बद्बधानाः । (बिभीषथाः) माबिभीषथा राजन् ।

भिक्षमाणा, भामा, भरा, भरता, भिन्दाना, भ्रमा, भोजा, बृहद्भाः ॥

एते विसर्गान्ता भवन्ति । उदा० (भिक्षमाणाः) त्वे अग्ने सुमतिं भिक्षमाणाः । (भामाः) भामा न वरन्ते परिबाधः । (भराः) शक्तो वो यद्विभराः । (भरताः) अतारिषुर्भरताः । (भिन्दानाः) पात्राभिन्दानाः । (भ्रमाः) अग्नेरिव भ्रमा वृथा । (भोजा) भोजा जिग्युः सुरभिं । (बृहद्भाः) बृहद्भा बिभृतो हविः । बृहदिति किं ? मात्वा काचिदभिभाविद्व्याविदत् ॥

भृता येषुपरः ॥

येषुपरो भृना इति विसर्गान्तो भवति । उदा० शर्यातस्य प्रभृना येषु मन्दसे । येषुपर इति किं? यदीं सुक्षत्रप्रभृना मदस्य ॥

त्वया वयं, यदक्रन्दोऽबुध्रमुत्यमेतेषु भद्राः ॥

एतेषु वर्गेषु भद्रा इति विसर्गान्तो भवति । उदा० (त्वया वयं) भद्रा भद्रस्य रातयः । (यदक्रन्दः) अत्रा ते भद्रा रशना अपश्यम् । (अबुध्रमुत्यं) भद्रा नो अद्य श्रवसे व्युच्छत । एतेष्विति किं? भद्रा नाम वहमाना उषासः ॥

मूराः, सुमेधा, मृगा, म्रदा, मोदमाना, मदा, मन्द्रा मर्ता, मृज्यमाना, मित्रा, मर्या, मृधा, मदिता, मन्वाना, वध्रिमत्या, वां भूमयो मन्यमाना, नमासा, सगोमधा, अच्छ शुचयो मनीषाः, विन्मिमाना, भरन्मानुषा, ते मरुतो मन्दसानाः ॥

एते विसर्गान्ता भवन्ति । उदा० (मूराः) ते अप्रमूरा महोभिः । (सुमेधाः) होता पावकः प्रदिवः सुमेधाः । स्विति किं? श्रिये कं वो अधिनन्यूषु वाशीर्मेधा । (मृगाः) मृगान भीमास्तवीषीभिरर्चिनः । (म्रदाः) ऊर्गम्रदा विपयस्व । (मोदमानाः) उपक्षे वृषणो मोदमानाः । (मदाः) ते त्वा मदा बृहदिन्द्र स्वधावः । (मन्द्राः) मन्द्रा गिरो देवयन्तीरुपस्थुः । (मर्ताः) मर्ता नरः पिञ्शासः पुरुत्रा । (मृज्यमानाः) मृज्यमाना गभस्त्योः । (मित्राः) यदीं सुमित्राः । (मर्याः) वरेयवो नमर्या घृतप्रुषः । (मृधाः) पुरूरवो मामृवामा प्रपम्यः । (मदिताः) उन्मदिजा मौनेयेन । (मन्वानाः) ऋतं मन्वाना व्यदर्हिरुर्वलम् । (वध्रिमत्याः) श्रुतं तच्छासुरिव वध्रिमत्याः । (वां भूमयो मन्यमानाः) इमा उवां भूमयो मन्यमानाः (नमासाः) न यं

जरन्ति शरदो न मासाः। (सगोमघाः) सगोमघा जरित्रे अश्वश्चन्द्राः। (अच्छ मनीषाः) प्रच्छा मनीषाः। (शुचयो मनीषाः) दिवः शर्धाय शुचयो मनीषाः। (विन्मिमानाः) दुर्मित्रासः प्रकलविन्मिमानाः। (भरन्मानुषाः) प्रवां भरन्मानुषा देवयन्तः। (ते मन्दसानाः) ते मन्दसाना धुनयो रिशादसः। (मरुतो मन्दसानाः) उतत्येनो मरुतो मन्दसानाः। वध्रिमत्यादि पूर्व इति किम्? मधुमत्या नः कशया मिमिक्षतम्। अवद्यमिव मन्यमाना गुहाकः। अस्मा एतद्दिव्य१र्चेवमासा। कदागोमधा हवनानि गच्छाः। प्रवांयुमच्छा बृहती मनीषा। प्रथमा सुवाचा मिमाना यज्ञम्। ये दैव्यानि मानुषा जनूँषि। अस्मिन् यज्ञे मन्दसाना वृषण्वसू। एतेषु प्रत्युदाहरणेषु विसर्गो न ॥

मध्रा नेमिंपरः ॥

नेमिंपरो मध्रा इति विसर्गान्तो भवति। उदा० मध्रा नेमिं निवावृतुः। नेमिंपर इति किम्? मध्रा रजांस्यश्विना विघोषैः ॥

मना *इंग्यान्तः।

विभागान्तो मना इति विसर्गान्तो भवति। उदा० उतो न एभिः सुमनाः। इंग्यान्त इति किं? सुमना हिरण्यया ॥

मनुष्याः ॥

अयं विसर्गान्तो भवति। उदा० यस्यां बीजं मनुष्या३ वपन्ती ॥

न युगानिपरः ॥

युगानिपरो मनुष्या इति विसर्गान्तो न भवति। उदा० प्रमिनती मनुष्या युगानि ॥

---

* इंग्यशब्दो विभागशब्दस्य पर्यायः। द्विखण्ड इति प्रसिद्धार्थः।

मायाः ॥

अयं विसर्गान्तो भवति । उदा० याश्च माया मायिनां विश्वमिन्व ॥

न माययापूर्वः ॥

माययापूर्वो माया इति विसर्गान्तो न भवति । उदा० असुरस्य मायया । माया वां मित्रावरुणा ॥

यजत्रा, यस्या, यतमाना, यजमाना, युजाना, यज्ञिया, योधया, यूया, यात्या, यक्ष्मा, त्वेषयामा, अरोहत् सुयमाः ॥

एते विसर्गान्ता भवन्ति । उदा० (यजत्राः) ये यजत्रा य ईड्याः । (यस्याः) यस्या रुशन्तो अर्चयः (यतमानाः) यतमाना रश्मिभिः सूर्यस्य । (यजमानाः) यजिष्ठत्वो यजमाना हवेम । (युजानाः) अतो वयमन्तमेभिर्युजानाः । (यज्ञियाः) ये देवानां यज्ञिया यज्ञियानाम् । (योधया) यद्योधया महतो मन्यमानान् । (यूयाः) अधा सवीरैर्दशभिर्विंयूयाः । (यात्याः) शुचीते चक्रे यात्याः । (यक्ष्माः) यक्ष्मा यन्ति जनादनु । (त्वेषयामाः) यत् त्वेषयामा नदथन्त । त्वेष इति किं ? द्युतद्यामा नियुतः पत्यमानः इत्यत्र न । (अरोहत् सुयमाः) आसीमरोहत् सुयमा भवन्तीः । अरोहत् स्विति किं ? सुष्ठामा रथः सुयमा हरीते इत्यत्र न ॥

यज्ञा अनिंग्यान्तः ॥

न इंग्यान्तः अनिंग्यान्तः । तथाभूतो यज्ञा इति विसर्गान्तो भवति । उदा० हविष्मन्तो न यज्ञा विजानुषः । अनिंग्यान्त इति किं ? यज्ञा यज्ञावो अग्नये इत्यत्र न ॥

युता यत्परः ॥

यत्परको युना इति पदरूपः शब्दो विसर्गान्तो भवति । उदा० इहेह वत्सैर्वियुना यदासन् । यत्पर इति किं ? आपूर्णया नियुना यातो अध्वरम् ॥

युक्ताः ॥

अयं विसर्गान्तो भवति । उदा० अवस्वयुक्ता दिव आवृथा ययुः ॥

न माता रथेन वह्निः परः ॥

पूर्वसूत्रात् युक्ता इत्यनुवर्त्तते । माता इत्यादिपरको युक्ता इति पदरूपः शब्दो विसर्गान्तो न भवति । उदा० (माता) युक्ता माता सीदद्धुरिदक्षिणायाः । (रथेन) युक्ता रथेन तविषं यजत्रा । (वह्निः) युक्ता वह्नि रथानाम् ॥

क्षत्रायोदीर्ध्वं, सुरुक्मेहि, त्वं नो गोपा, न दक्षिणाञ्जन्ति त्वां, अयं सो अग्निः, भूयामोषु, वायो शुक्रः, तंप्रत्नथा, आभात्यग्निः, आगावो अग्मन्, सुसंदृक्ते, समुद्रज्येष्ठाः, कुविदङ्ग, पिबासुतस्य, इमानिवां, वज्रेण, धर्मासमन्ता, मयोभूरभीवर्तेन, प्रनूनमेतेषु याः ॥

एतेषु वर्णेषु विद्यमाना या इति पदरूपः शब्दो विसर्गान्तो भवति । उदा० (क्षत्राय) या व्यूषुर्याश्च नूनम् । (उदीर्ध्वं) या गोमतीरुषसः सर्ववीराः । (सुरुक्मेहि) यावः सर्वा उषसुवे । (त्वं नो गोपाः) यानो दूरे दलितो या अरातयः । (न दक्षिणा) यावो माया अभिद्रुहे यजत्राः । (अञ्जन्ति त्वां) देवया विप्रउदियर्ति वाचं । (अयं सो अग्निः) या रोचने परस्तात् सूर्यस्य । [भूयामोषु त्वावतः] या मन्दसान आरुजः । [वायो शुक्रो अयामिते] या वां सन्ति पुरुस्पृहः । [तं प्रत्नथा पूर्वथा] श्रिये

सुदृशीरुपरस्य यास्वः । [आभात्यग्निरुषसामनीकं] उद्धिषाणां देवया वाचो अस्थुः । (आगावो अग्मन्नुत) इमा या गावः सजनास इन्द्रः । [सुसंदृक्ते स्वनीक] या वाते सन्ति दाशुषे अधृष्टाः । (समुद्रज्येष्ठाः) इन्द्रो या वज्री वृषभो ररादं । (कुविदङ्गनमसा) यावां शतं नियुतो याः । [पिबा-सुतस्य रसिनः] गिरो वर्धन्तु या मम । (इमानि वां भागधेयानि) याह वामिन्द्रा वरुणाघृतश्चुतः । (वज्रेण हि वृत्रहावृत्रमस्तः) मुमुक्षमाणा उत्तयामुमुक्त्रे । (धर्म समन्ता त्रिवृतं व्यापतुः) परेषु या गुह्येषु व्रतेषु । (मयोभूर्वातो अभिवातूस्राः) या देवेषु तन्व१मैरयन्त । [अभीवर्तेन हविषा] अभियानो अरातयः । (प्रनूनं जातवेदसं) या रुचो जातवेदसः । एतेष्विति किं? यावां कशामधुमती इत्यत्र न ॥

प्रमेयदिन्द्राग्नी एतयोर्द्वितीययाः ॥

स्पष्टोर्थः । उदा० (प्रमेविविक्वान्) याजामयोवृष्णे । [यदिन्द्राग्नी जना इमे] यानुपाधन्तनोधियः । द्वितीयया इति किं? सद्यश्चिद्याद्दुदुहे भूरिदासेः इत्यत्र न । यानुश्वेनाववोदिवः । इत्यत्र न ॥

ऋणपूर्वश्च ॥

सान्निध्यात् या इति लभ्यते । ऋणपूर्वो या इति विसर्गान्तो भवति । उदा० स ऋण चिद्रणया ब्रह्मणस्पतिः । ऋणपूर्व इति किं? आविर्भव सुकृतुया विवस्वते ॥

रेषणा, रेता, रभिष्ठा, रंहा, रणा, ररीथा, रेजमाना, रक्षमाणा, सुरुक्मा: ॥

एते विसर्गान्ता भवन्ति । उदा० (रेषणाः) गर्भे सन्तं रेषणा रेषयन्ती । (रेताः) सहस्र रेता वृषभस्तुविष्मान् । (रभिष्ठाः) पृश्नेः पुत्रा उपमासो रभिष्ठाः । (रंहाः) मनोजवा अश्विना वातरंहाः । (रणाः)

रणा वाये निषदि सत्ते अस्य । (ररीथाः) माजस्वने वृषभनो ररीथाः । (रेजमानाः) युष्मद्भिया वृषणो रेजमानाः । (रक्षमाणाः) उदप्रुतो नवयो रक्षमाणाः । (सुरुक्माः) वक्षः सुरुक्मा मरुतो रथे शुभः । स्विति किं ? अधिरुक्माविनीयते इत्यत्र न ॥

शुचिन्न, विद्युत्त्वासु, रथाः ।

शुचित् न विद्युत्, त्वासु, इत्येवंपूर्वो रथा इति विसर्गान्तो भवति । उदा० (शुचित्) पीवो अश्वाः शुचिद्रथा हि भूता । (न) पृषदश्वासो वनयो न रथाः । (विद्युत्) विद्युद्रथा मरुत ऋष्टिमन्तः । (त्वासु) स्वश्वास्त्वा सुरथा मर्जयेम । एवंपूर्व इति किम् ? सर्वरथा विहरी इह मुञ्च । त्वास्विति किम् ? या सुरथा रथीतम ॥

पितोरसाः, स्वानिनो रुद्रिया, देवो रोचमाना, ऋतौ रण्वाः ॥

पितवादिपूर्वो रसा इति विसर्गान्तो भवति । उदा० (पितोरसाः) तवत्ये पितो रसाः । (स्वानिनो रुद्रिया) स्वानिनो रुद्रियाः । (देवो रोचमानाः) देवो रोचमाना महोभिः । (ऋतौ रण्वाः) कुत्साचिद्यस्य समृतौ रण्वानरः । एवंपूर्व इति किम् ? सा बीभत्सुर्गर्भ रसानिविद्धा । प्ररुद्रिया जभ्रिरे यज्ञियासः । उषो देवि रोचमाना महोभिः अस्य रण्वा स्वस्येव पुष्टिः । (एतेषु विसर्गो न)

रुद्राः ॥

अयं विसर्गान्तो भवति । उदा० सुखेषु रुद्रा मरुतो रथेषु ॥

न वर्तिर्युवं ते पूर्वः ॥

एवंपूर्वो रुद्रा इति विसर्गान्तो न भवति । उदा० [वर्ति] वर्ती

रुद्रा नृपाय्यं [युवम्] अश्विना गच्छतं युवम् । रुद्रा हिरण्यवर्तनी [ते] वयं ते रुद्रा स्याम ॥

एकयाः सरूपाः ॥

एवंपूर्वो रूपा इति विसर्गान्तो भवति । उदा० [एकरूपा] एकरूपा यासामग्निः । [याः सरूपाः] याः सरूपा विरूपाः । एवंपूर्व इति किं ? पद्यावस्ते पुरुरूपा वपूँषि । स्वे योनौ निषदतं सरूपा ॥

लोकाः ॥

स्पष्टोऽर्थः । उदा० लोका यत्र ज्योतिष्मन्तः ॥

वसाना वर्चा विष्फुलिङ्गकाः वच्यमाना वल्शा विवस्वत्या वर्धमाना वरत्रा वाजा वया वृजना वसिष्ठा विक्ताः व्रा वेना विश्वस्या वचा षासा वशा वृका शतव्रजा प्रवाताः ॥

स्पष्टोर्थः । उदा० [वसाना] शुक्रावसानाः स्वर्वो न आगुः । [वर्चाः] जुजोषदिन्द्रोदस्मवर्चाः । [विष्फुलिङ्गकाः] त्रिः सप्तविष्फुलिङ्गकाः । [वच्यमानाः] प्रकारवो मनना वच्यमानाः । [वल्शाः] सहस्रवल्शा विवयं रुहेम । [विवस्वत्याः] विवस्वत्या महिचित्रमनीकं [वर्धमानाः] इमा उते प्रण्योः३ वर्धमानाः । [वरत्राः] शुनं वरत्रा बध्यन्तां । [वाजाः] ऋभुक्षणो वाजा मादयध्वम् । [वयाः] वृक्षस्य नु ते पुरुहूत वयाः । [वृजनाः] मानो अज्ञाता वृजना दुराध्यः । [वसिष्ठाः] प्रतिस्तोमेभिरुषसं वसिष्ठाः । [विक्ताः] कृष्टीरन्यो धारयसि प्रविक्ताः । [व्राः] मृगं नव्रामृगयन्ते । [वेनाः] वेना दुहन्त्युक्षणं गिरिष्ठाम् । (विश्वस्याः) । ईशे यो विश्वस्या देववीतेः । [वचाः] इदमित्था रौद्रं गूर्तवचाः । [वासाः] स्वश्वासिन्धुः सुरथाः सुवासाः । [वशाः] वशा मेषा अवसृष्टास आहुताः ।

[वृकाः] अथैनं वृका रभसासो अद्युः । [शतव्रजाः] शतव्रजारिपुणा नावचक्षे । शतेति किं ? ये पक्वभिः शफानां व्रजा । [प्रवाताः] प्रवाता वान्ति पतयन्ति विद्युतः । प्रेति किं ? सन्ते शस्तिर्देववाता ॥

वृणानाः ॥

स्पष्टोर्थः । उदा० अग्निं वृणाना वृणते कविक्रतुम् ॥

न विपरः ॥

विपरो वृणाना इति विसर्गान्तो न भवति । उदा० अपो वृणाना वितनोति मायिनी ॥

विप्राः ॥

स्पष्टोर्थः । उदा० तं त्वा विप्रा वचोविदः ॥

न श्रयेतामसमानीयं वन्तापूर्वः ॥

श्रयेतां, असमानि, इयं, वन्ता इत्येवंपूर्वो विप्रा इति विसर्गान्तो न भवति । उदा० [श्रयेतां] आयज्ञिये सुविताय श्रयेतां । विप्रा यज्ञेषु मानूषेषु । [असमानि] एषां ब्रह्माण्यसमानि विप्रा । [इयम्] इयं विप्रा मेधसातये । [वन्ता] स्मदभीशूकशावन्ता विप्रा ॥

विदाः ॥

स्पष्टोर्थः । उदा० विदादिवोविष्यन्नद्रिमुक्थैः ॥

न चकृमापूर्वः । इङ्ग्यान्तश्च ॥

इङ्ग्यान्तश्च चकृमापूर्वश्च विदा इति विसर्गान्तो न भवति । उदा० [चकृम] शक्तीवायत्तेचकृमाविदावा । [इङ्ग्यान्तश्च] वृत्रघ्ना वरिवोविदा ॥

वीराः ॥

स्पष्टोऽर्थः । पीवानं मेषमपचन्त वीराः ॥

न विट्सुपूर्वः ॥

विट्सु इत्येवंपूर्वो वीरा इति विसर्गान्तो न भवति । उदा० सा विट्सुवीरा मरुद्भिरस्तु । विट्स्विति किम् ? त्वां स्तोषाम त्वया सुवीराः ॥

वावशानाः ॥

स्पष्टोऽर्थः । उदा० ऋतस्य हि धेनवो वावशानाः ॥

अनभिपूर्वः ॥

अभिपूर्वो वावशाना इति विसर्गान्तो न भवति । उदा० सुकाणं धर्ममभिवावशाना ॥

व्यचाः ॥

स्पष्टोऽर्थः । उदा० उरुव्यचा जठर आवृषस्व ॥

न वरिमतापरः ॥

वरिमतापरो व्यचा इति विसर्गान्तो न भवति । उदा० उरुव्यचा वरिमता गभीरम् ॥

वारा होतारो यतमानाः परः ॥

होतारः, यतमानाः इत्येवंपरो वारा इति विसर्गान्तो भवति । उदा० [होतारः] आयज्यवः सुमतिं विश्ववारा होतारः । [यतमानाः] अश्वावतीर्गोमतीर्विश्ववारा यतमानाः । एवंपर इति किं ? प्रदीधितिर्विश्ववारा जिगाति इत्यत्र न ॥

वृता द्वारःपरः ॥

द्वारःपरः वृता इति विसर्गान्तो भवति । उदा० परीवृताद्वार इषः परीवृताः । द्वारःपर इति किम् ? विश्वा यद्वोला सहसा परीवृता इत्यत्र न ॥

वेदाः ॥

स्पष्टोर्थः । उदा० ररक्ष तान् त्सुकृतो विश्ववेदाः ॥

न सुपूर्वः ॥

सुपूर्वो वेदा इति विसर्गान्तो न भवति । उदा० सुवेदानो वसूकृधि ॥

वीता महत्परः ॥

महत्परः वीता इति विसर्गान्तो भवति । उदा० अन्तर्वतीः सुवते अप्रवीता महत् । महत्पर इति किम् ? यदप्रवीता दधतेह गर्भः ॥

वक्का ध्वस्राः परः ॥

ध्वस्राः परो वक्का इति विसर्गान्तो भवति । उदा० प्राग्रुवो नभन्वो ३ नवक्का ध्वस्राः । ध्वस्राः पर इति किम् ? असार्जि वक्कारथ्ये यथाजौ ॥

यो, हि माया, भुवो, वि, स्पृधो, मतीः, धियो, नियुतो, नमन्त, यदजयो, मृधः, परोविश्वाः ॥

एवंपरो विसर्गान्तो भवति । उदा० (यः) विश्वायश्चर्षणीरभि । (हिमायाः) विश्वाहिमाया अवसि स्वधावः हिमाया इति किम् ? विश्वाहिवो नमस्यानि वन्द्या । (भुवः) । स विश्वाभुव आभवः । (वि) धियोविश्वा विराजसी । (स्पृधः) विश्वास्पृध आर्येण दस्यून् । (मतीः) विश्वामतीराततने त्वाया । (धियः) विश्वाधियो अश्विना प्रावतं मे । (नियुतः) अभिवां विश्वा नियुतः सचन्ते । (नमन्त) विश्वानमन्तकृष्टयः । (यदजयः) विश्वायदजयः स्पृधः । यदजय इति किम् ? विश्वायद्वामनुष्टवे । (मृधः) विश्वा मृधो विचर्षणिः । एवंपर इति किम् ? य इमा विश्वा भुवनानि जुह्वत् ॥

नेन्द्रपूर्वः ।

इन्द्रपूर्वो विश्वा इति विसर्गान्तो न भवति । उदा० इन्द्रो विश्वायोतिश्रृण्वे ॥

शुष्माः, शविष्ठाः, श्रवाः, श्रीताः, शिप्राः, शोकाः, शयाः, शोभिष्ठाः, शिशूलाः, शपथाः, श्रुष्टाः ॥

स्पष्टोऽर्थः । उदा० (शुष्माः) शुष्मायदस्य प्रत्नथा । (शविष्ठाः) । तनाच ये मघवानः शविष्ठाः (श्रवाः) स्वस्तिन इन्द्रो वृद्धश्रवाः । (श्रीताः) गोश्रीता मत्सरा इमे । (शिप्राः) हिरण्यशिप्रा मरुतोदविध्वतः । (शोकाः) द्रवन्त्यस्य वाजिनोन शोकाः । (शयाः) प्रोष्ठेशया वह्येशयाः । (शोभिष्ठाः) यामं येष्ठाः शुभा शोभिष्ठाः । (शिशूलाः) शिशूला न क्रीळयः सुमातरः । (शपथाः) प्रत्यगेनं शपथा यन्तु । (श्रुष्टाः) मुहुः श्रुष्टा मनस्यवे ॥

तमाः, सोमा, स्तव, शुक्राः ॥

एवंपरः शुक्राः इति विसर्गान्तो भवति । उदा० (तमाः) ते सुतासो मदिन्तमाः । (सोमाः) सोमाः शुक्रा गवा शिरः । (तव) यदग्ने शुचयस्तव शुक्राः । एवंपूर्व इति किम्? दधानः शुक्रा रभसा वपूंषि ॥

गृभ्णाति विश्रिता, माश्यावाः, कविशस्ता त्रिशताः, सुशंशा, ऊर्मिः शम्याः ॥

गृभ्णातीत्यादिपूर्वविश्रितादयो विसर्गान्ता भवन्ति । (गृभ्णाति) प्रतिगृभ्णाति विश्रिता वरीमभिः । (माश्यावाः) उपमाश्यावाः स्वनयेन दत्ताः । (कविशस्ताः) आत्वामन्त्राः कविशस्ता वहन्तु । (त्रिशताः) तस्मिन्त्साकं त्रिशता न शङ्कवः । (सुशंसाः) प्रसुशंसामतिभिस्तारिषीमहि । (ऊर्मिः शम्याः) उद्व ऊर्मिः शम्याहन्त्वापः । क्रमेण अपवादमाह गृभ्णातीत्यादिपूर्व इति किम्? बर्हिष्मतीरातिर्विश्रितागीः । विश्वाभि-

गीर्भिरमृतो विचेताः । इयावा । एकस्त्वष्टुरश्वस्या विशस्ता । त्वं शतावङ्गृदस्याभिनत्पुरः । उरुशंसा न मो वृधा । इद्धाग्नयः शम्या ये सुकृत्यया ॥

शूराः ॥

स्पष्टोऽर्थः । वृत्रेषु शूरा मंसन्त उग्राः ॥

न मंहिष्ठा परः ॥

मंहिष्ठापरः शूरा इति विसर्गान्तो न भवति । उदा० शूरा मंहिष्ठा पितरेव शम्भू ॥

शिवाः ॥

स्पष्टोर्थः । उदा० शिवा देवीरशिपदा भवन्तु ।

न नः परः ॥

नः परः शिवा इति विसर्गान्तो न भवति । उदा० शिवा नः सख्या सन्तु भ्रात्रा ॥

शुभ्राः ॥

स्पष्टोर्थः । उदा० ये शुभ्रा घोरवर्पसः ।

न यातंविश्वनपरः ॥

यातं विश्व न इत्येवंपरः शुभ्रा इति विसर्गान्तो न भवति ॥ उदा० (यातं) आ शुभ्रा यातमश्विना स्वश्वा । (विश्व) यातिशुभ्रा विश्वपिशारथेन । (न) एषा शुभ्रानतन्वो विदाना ॥

सौधन्वनाः, सेनाः, स्तोकाः, सिंहाः, स्नाः, सर्गाः, सुसंशिताः, सोमाः, स्वाः, स्तोमाः, सुवानाः, स्वनाः, निषत्ताः, सस्राः, सूर्यायाः, सूभर्वाः, सुरायाः ॥

स्पष्टोर्थः । उदा० (सौधन्वनाः) सौधन्वना यदिसत्रेव हर्यथ ।

(सेनाः) उत न ईं मरुतो वृद्धसेनाः । (स्तोकाः) स्तोकाश्चोदन्ति मेदसः (सिंहाः) सिंहा न हेषक्रतवः सुदानवः । (स्नाः) तवत्ये अग्ने हरितो घृतस्नाः (सर्गाः) श्रिये सुदृशो वपुरस्य सर्गाः (सुसंशिताः) सुसंशिता वक्ष्यो वक्षणे स्थाः । (सोमाः) एते शुक्रासो धन्वन्तु सोमाः । (स्वाः) आयाह्यग्ने पथ्या३अनु स्वाः । (स्तोमाः) एते स्तोमा नरां नृतम । (सुवानाः) सुवाना देवास इन्दवः । (स्वनाः) स्वना न यस्य भामासः पवन्ते । (निषत्ताः) ये पार्थिवे रजस्या निषत्ताः । नीति किं? यदी पवित्रे अधिमृज्यते हरी सत्ता । (सस्राः) त्रिः सप्तसस्रा नद्यो महीरपः । (सूर्यायाः) सूर्याया वहतुः प्रागात् । (सूभर्वाः) ते सूभर्वा वृषभा प्रेमराविषुः । (सुरायाः)भोजा जिग्युरन्तः पेयं सुरायाः ॥

प्रसूनृतानरः प्रस्पन्द्रा नभिष्ठिराः ॥

प्रादिपूर्वाः सूनृतादयो विसर्गान्ता भवन्ति । उदा० प्रसूनृतादि-शमान ऋतेन । प्रेति किम्? एवाह्यस्य सूनृता विरप्शी । (नरः प्रस्पन्द्राः) उतस्म ते शुभे नरः प्रस्पन्द्राः । नरः प्रेति किम्? प्रयद्वहेथे महिना रथस्य प्रस्पन्द्रा (न स्थिराः) नयंदुधावरन्ते न स्थिरासुरः । (भिस्थिराः) यातेमखिद्रयामभिः । स्थिरावः । नभीतिकिम्? कंयाथः कंहधूतयः । स्थिरावः सन्तु इत्यत्र न ॥

भवन्तु तास्त्वासर्वाः ॥

एवंपूर्वः सर्वा इति विसर्गान्तो भवति । उदा० (भवन्तु) अशिमिदा भवन्तु सर्वाः । (ताः) ताः सर्वाः स्थापयामसि । (त्वा) विशस्त्वा सर्वा वाञ्छन्तु । एवंपूर्व इति किम्? चित्तामुतः सर्वा भ्रूणाण्यारुषी ॥

चस्याः ॥

स्पष्टोऽर्थः । उदा० नूनं न इन्द्रा पराय चस्याः । चेति किम्? क १ स्यावो मरुतः स्वधासीत् ॥

अद्रुहनो मनीषाः स्पार्हाः ॥

एवंपूर्वः स्पार्हा इति विसर्गान्तो भवति। उदा० (अद्रुह) विश्वे देवासो अद्रुहः। स्पार्हा भवन्ति रन्तयः। (नः) वस्वः कुविद्वनाति नः। स्पार्हा यस्य श्रियो दृशे। (मनीषाः) प्रद्यच्छा मनीषाः स्पार्हाः। एवंपूर्व इति किम्? तिरस्यतापरमासन्ति सत्या स्पार्हा ॥

सृष्टा देवपरः ॥

देवपरः सृष्टा इति विसर्गान्तो भवति। उदा० ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना। देवपर इति किम्? सेनेव सृष्टा दिव्या यथाशनिः ॥

स्थाः ॥

स्पष्टोऽर्थः। उदा० य उद्दचि यज्ञे अध्वरेष्ठाः ॥

न प्रतिघर्म्ये पूर्वः ॥

एवंपूर्वः स्था इति विसर्गान्तो न भवति। उदा० (प्रति) साकं प्रतिष्ठा हव्या जगन्थ। (घर्म्ये) वाजेवोच्चा वयसा घर्म्येष्ठा ॥

सध्रीचीना निपरः ॥

निपरः सध्रीचीना इति विसर्गान्तो भवति। उदा० सध्रीचीनानि वावृतुः। निपर इति किम्? सध्रीचीना यातवे प्रेमजीगः ॥

स्तोम्याः ॥

स्पष्टोऽर्थः उदा० अस्तोढ्वं स्तोम्या ब्रह्मणा मे ॥

नभूत्परः ॥

भूत्परः स्तोम्या इति विसर्गान्तो न भवति। उदा० सरस्वती स्तोम्याभूत् ॥

सत्याः ॥

स्पष्टोर्थः । उदा० उभौ वर्णा वृषिरुग्रः पुपोष सत्याः ॥

न संति चाकूति युयुधुः पूर्वः ॥

एवं पूर्वः सत्या इति विसर्गान्तो न भवति । (सन्ति) त्रिरस्यतापरमासन्ति सत्या । (च) व्य१र्केण बिभिदुर्ब्रह्मणा च सत्या । (आकूतिः) आकूतिः सत्या मनसो मे अस्तु । (युयुधुः) सुदास इन्द्रा वरुणा न युयुधुः । सत्या नृणाम् ॥

सुताः, स्तुताः, सह, इत्येते अनिङ्क्यान्ताः ॥

अनिङ्क्यान्ता एते त्रयः शब्दा विसर्गान्ता भवन्ति । उदा० (सुताः) दस्रा युवाकवः सुताः । (स्तुताः) स्तुता धीभिरिषण्यत । (सह) साहाये सन्ति मुष्टिहेवहव्यः । अनिंग्यान्ता इति किम्? पिबाथो अस्मे सुषुता मधूनि । नक्षद्वाणी सुष्टुता धिष्ण्यावाम् । युक्ष्वा हित्वं रथासहा ॥

सा इङ्ग्यान्तः ॥

विभागवत्पदान्तः सा इति विसर्गान्तो भवति । उदा० मधुपृचं धनसा जोहवीमि । इङ्ग्यान्त इति किम्? सानो नाभिः परमास्य वाघ ॥

हिमा, हवमाना, हूयमाना, हिन्वाना, हर्या, हुवाना, हूवृता, हाया, हेत्याः ॥

स्पष्टोऽर्थः । उदा० (हिमाः) विसूरयः शतहिमा नो अश्युः । (हवमानाः) नाना हित्वा हवमाना जनाः इमे । (हूयमानाः) विश्रयन्तामुर्विया हूयमानाः । (हिन्वानाः) इन्द्रो हिन्वाना द्रविणान्याशत । [हर्याः] यदीदग्ने प्रतित्वं देवहर्याः । [हुवानाः] विश्वेदेवा ऋतावृधो हुवानाः । [हूवृताः] अपरिह्वृता दधिरे दिविक्षयम् । (हायाः) विश्वकर्मा विमना आद्विहायाः । (हेत्याः) माते हेत्यामुक्षत दैव्यायाः ॥

वीरहव्या, श्वहा, दीयद्रश्मानो हिरण्यया, विहोत्राः ॥

वीरादिपूर्वो हव्यादयो विसर्गान्ता भवन्ति । उदा० (वीरहव्याः) हव्यं वीरहव्या हवन्ते । वीरेति किम् ? युष्मभ्यं हव्यानिशितान्यासन् । (चहाः) माचहामाचरीरिषत् । चेति किम् ? अमित्रहा वृत्रहा दस्युहाच । (दीयद्धिरण्ययाः) पर्यणांसि दीयत् । हिरण्ययावाम् । (रश्मानो हिरण्ययाः) स्थारश्मानो हिरण्ययाः । नीयद्रश्मान इति किम् ? उदस्य बाहू शिथिरा बृहन्ता हिरण्यया । (विहोत्राः) विहोत्रा दधे वयुनाविदेकइत् । वीति किम् ? प्राञ्चं कृणोत्यध्वरम् । होत्रा देवेषु ॥

हिता अनिङ्क्यान्तः ॥

विभागवत्पदान्तः हिता इति विसर्गान्तो भवति । उदा० हिता न सप्तयो रथे । अनिङ्क्यान्त इति किम् ? पदाविदन्निहिता यज्ञियासः ॥

वृष्णो, नमसा, वातापर्जन्याः परो हस्ताः ॥

एवंपरो हस्ता इति विसर्गान्तो भवति । उदा० [वृष्णः] दमूनसो अपसो ये सुहस्ता वृष्णः (नमसा) उत्तानहस्ता नमसोपसद्यः । (वाता पर्जन्या) धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या । एवंपर इति किम् ? येषामिळा घृतहस्ता दुरोण आ इत्यत्र न ॥

यज्ञनारायणाख्यस्य यज्वनः प्रियसूनुना ।
शमानं साधु व्याख्यातं नागदेवेन निर्मितम् ॥

इति ऋग्वेदसप्तलक्षणव्याख्यायां शमानप्रकरणं समाप्तम् ॥

हरिः ओं ॥

॥ उपलेखसूत्रम् ॥

अकारादयो द्वादश स्वराः ॥

अकार आदिः प्रथमो येषां ते अकारादयः । द्वौ च दश चेति द्वन्द्वः । स्वरा इति संज्ञा अभिधीयते । ननु यथा चित्रगुमानयेत्युक्ते विशेषणभूतानां गवामानयने संबन्धो नास्ति, एवमकारादयः स्वरा इत्युक्ते विशेषणभूतस्याकारस्य स्वरसंज्ञा न प्राप्नोतीति चोद्यम् । नैतदस्ति लम्बकर्णमानयेत्युक्ते विशेषणभूतयोरपि कर्णयोरानयनेन सम्बन्धः । तथेहापि विशेषणभूतस्याकारस्य स्वरसम्बन्धो भवति । एवं प्रतिसूत्रं वेदितव्यम् । इदानीं सूत्रार्थः संक्षिप्यते । अकारादयो द्वादश संज्ञेया वर्णाः स्वरसंज्ञका भवन्ति । के पुनस्ते? उच्यन्ते । अ आ इ ई उ ऊ ऋ ॠ ऌ ए ऐ ओ औ इति । एषां पूर्वोक्तेन समासेन ग्रहणात् सर्वेषां स्वरसंज्ञा क्रियते सम्यग्व्यवहारार्थं लोके शास्त्रे च । तस्य प्रयोजनं किं? अथ स्वरादेराद्यमक्षरं इति ॥

शिष्टं व्यञ्जनम् ॥

द्वादशभ्यः स्वरेभ्यः यच्छिष्टमुर्वारितं वर्णजातं तद्व्यञ्जनसंज्ञं भवति । व्यञ्जनसंज्ञायाः प्रयोजनं नियतादेः परस्य इति । कानि पुनस्तानि? उच्यन्ते । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व श ष स ह ≍क ≍प अः अम् ॥

ककारादयः पञ्च पञ्च वर्गाः स्पर्शाः ॥

ककार आदिः येषां ते ककारादयः । पञ्च पञ्चाक्षराणि वर्गसंज्ञानि भवन्ति । के पुनस्ते? क ख ग घ ङाः । च छ ज झ

ञाः । ट ठ ड ढ णाः । त थ द ध नाः । प फ ब भ माः । इति पञ्चविंशतिः कादयः स्पर्शाः इत्युक्ताः ॥

यकारादयश्चतस्रोऽन्तस्थाः ॥

यकार आदिर्येषां ते यकारादयः । चत्वारो वर्णा अन्तस्थसंज्ञा भवन्ति । के पुनस्ते ? य र ल व इति । स्पर्शान्तस्थसंज्ञयोश्च प्रयोजनं तत्परिज्ञानार्थम् ॥

शकारादयोऽष्टौ ऊष्माणः क×पौ×विसर्गानुस्वारौ ॥

शकार आदिः येषां ते शकारादयः । शकारादयोऽष्टौ ऊष्मसंज्ञा भवन्ति । के पुनस्ते ? उच्यन्ते । श ष स ह विसर्जनीयः जिह्वामूलीय उपध्मानीयोऽनुस्वार इति । ऊष्मसंज्ञायाः प्रयोजनं ऊष्मान्ते रेफेण इति ॥

प्रथमद्वितीया वर्गाणामूष्माणश्च हकारवर्जमघोषवन्तः ॥

प्रथमाश्च द्वितीयाश्च वर्गाणां प्रथमद्वितीयाः । ऊष्माणश्च हकारं वर्जयित्वा अघोषसंज्ञा भवन्ति । के पुनस्ते ? उच्यते – क ख च छ ट ठ त थ प फ श ष स जिह्वामूलीयोपध्मानीयविसर्जनीयानुस्वारा इति । अघोषसंज्ञायाः प्रयोजनं ऊर्ध्वः स्वरितम् इत्यत्र ।

शिष्टं घोषवत् ॥

अघोषसंज्ञेभ्योऽवशिष्टमुर्वरितं व्यञ्जनजातं तत् घोषसंज्ञं भवति । तद्यथा ग घ ङ, ज झ ञ, ड ढ ण, द ध न, ब भ म य र ल व हेति । घोषसंज्ञायाः प्रयोजनं तत्परिज्ञानार्थम् ॥

ह्रस्वमेकमात्रम् ॥

एका मात्रा यस्य स्वरस्य स एकमात्रः । सः ह्रस्वसंज्ञो भवति । ह्रस्वसंज्ञायाः प्रयोजनं ह्रस्वपूर्वौ इत्यत्र ॥

दीर्घं द्विमात्रम् ॥

द्वे मात्रे यस्यासौ द्विमात्रः । तं स्वरं दीर्घं विजानीयात् । तस्याः प्रयोजनं दीर्घसंधिं परिगृह्णीयात् ।

प्लुतं त्रिमात्रम् ॥

तिस्रो मात्रा यस्यासौ त्रिमात्रः । त्रिमात्रं स्वरं प्लुतं विजानीयात् । तस्याः प्रयोजनं पदप्लुतिः इत्यत्र ॥

व्यञ्जनमर्धमात्रम् ॥

व्यञ्जनं पुनः अर्धमात्रकालं विजानीयात् । यथा काचिद्धनुम् ।

स्वरभक्तिश्चाक्रमे ॥

रेफो यदा ऊष्मसु परतः ऋवर्णस्वरूपमापद्यते तदा स्वरभक्तिरुच्यते । न क्रमः अक्रमः तस्मिन् अक्रमे । क्रान्तिर्द्विर्वचनं द्वित्वमिति पर्यायः । असंयोगे परतः स्वरभक्तिरर्धमात्रा भवति । अदर्शिकर्हीति ॥

क्रमे त्वर्द्धोना ॥

अर्धमात्रा अर्द्धोना भवति मात्रायाश्चतुर्थो भाग इत्यर्थः । यथा दृश्यीवती ॥

क्रमो द्वैपदशः ॥

द्वाभ्यां द्वाभ्यां पदाभ्यां द्वैपदशः । अग्निमीले इति ॥

अर्द्धर्चात् ॥

अर्द्धर्चेन समापयेत् पूर्वपूर्वमुत्तरोत्तरेणार्द्धर्चेन सन्दध्यात् ॥

तयोरुत्तरेणोत्तरं पदं सन्दध्यात् ॥

यथा ईळे पुरोहितमिति ॥

ऊ इति मित्याकारे षत्वसंहिते स्विति पदे नःपरे नावस्येत् ॥

क्रमो द्वैपदश इत्यस्यायमपवादः । एषु अवसानं न कुर्यात् । षत्वं संहिता यस्य तत् षत्वसंहितम् । नः परं पदं यस्मात् तत् नःपरं । स्विति पदम् । यथा एत वा उ अस्मि । उदुत्यम् । त्यमुवः । यमी-गर्भम् । एरिणन्ति । समी विव्याच । (स आनः) मित्रयोराँ एति । महेषुणः । गव्येषुणः । अस्या ऊषुणः । षत्वसंहित इति किं? तत्सुसुनः नेह । षत्वसंहितेत्यत्र स्विति पदे नःपरेऽप्यवसानं नेष्यते । तत्कथं लभ्यते? यदि षत्वसंहित इति तस्य विशेषणं क्रियते । तेन लभ्यते । यत्र षत्वसंहितस्याभावः तत्रावसानप्रतिषेधाभावः । तत्सुसुनः । नः सविता । नःपर इति किं? स्विति पदे षत्वसंहितेऽपि अनः परे अवसानप्रतिषेधो माभूत् । ताभिरूषु । अधिषु मोषु । ऊषु ॥

इत्युपलेखभाष्ये प्रथमो वर्गः ॥

अथ यदुक्तं क्रमो द्वैपदश इति किं पूर्वोक्तपदेन द्वितीयपदग्रह एव अतस्तमेवाधिकारमुपजीवन् विशेषमप्यपवादमाह —

न्याविध्यदिलीविसस्य ॥

अस्य त्रिपदक्रमस्य यन्मध्यपदमविध्यदिति तत्र क्रमो द्वैपदश इत्यवसानं प्राप्तम् । तत् न कुर्यात् । विलक्षणं चैतत् । वैलक्षण्यं चास्य दीर्घस्य लाक्षणिकत्वात् अविध्यदिति ॥

उषा आवर्तमः ॥

इत्यत्र रेफो लाक्षणिकः तस्माद्विलक्षणम् ॥

न्याघृणङ्घरुत्वन्तम् ॥

अत्र मध्यमपदस्य दीर्घत्वं अलाक्षणिकम् ।

अगादारैगुकृष्णा ॥

आरैगिति दीर्घत्वम् ।

योनिमारैगप ॥

आरैगिति दीर्घत्वम् ।

एनमायुनगिन्द्रः ॥

आयुनगिति दीर्घत्वम् ।

अहिहन्नारिणक्पथः ॥

आरिणगिति दीर्घत्वम् ।

न्यावृणग् भरत ॥

न्यावृणगिति दीर्घत्वम् ।

अभ्यादेवमोजसा ॥

आदेवमिति दीर्घत्वम् ।

रिक्तमारैक्चकार ॥

आरैगिति दीर्घत्वम् ।

रूप आरूपितं जबारु ॥

आरूपितमिति दीर्घत्वम् ।

अनायुधास आसता सचन्ताम् ॥

आसतेति दीर्घत्वम् ॥

शुनश्चिच्छेपं निदितम् ॥

शुनः शेपमित्यस्य पदस्य मध्ये चिदिति अस्य प्रवेशः ॥

क आसतो वचसः ॥

आसत इति दीर्घत्वम् ॥

य आयुक्त तुजा ॥

आयुक्तेति दीर्घत्वम् ॥

द्रुर्योण आवृणङ् मृध्रवाचः ॥

आवृणगिति दीर्घत्वम् ॥

द्रुर्योण आवृणङ् मृध्रवाचम् ॥

पूर्ववत् ॥

वीरास एतनमर्यासः ॥

इतनेतीकारस्यैकारः ॥

आशुष्माणः ॥

स्मेति षत्वम् ॥

अस्त्वासत इन्द्र ॥

आसत इति दीर्घत्वम् ।

हन्त्यासद्वदंतम् ॥

आसदिति दीर्घत्वम् ।

नकिरादेव ओहते ॥

आदेव इति दीर्घत्वम् ।

निराविध्यद्गिरिभ्यः ॥

आविध्यदिति दीर्घत्वम् ।

ईयते नरा च शंसं दैव्यम् ॥

नराशंसमित्यस्य पदस्य मध्ये चशब्दप्रवेशः ।

परीतोषिञ्चत ॥

विसर्जनीयस्य उत्वम् ।

कुरुश्रवणमावृणि राजानम् ॥

आवृणीति दीर्घत्वम् ।

नरा वा शंसं पूषणम् ॥

नरा शंसमित्यस्य पदस्य मध्ये वाशब्दप्रवेशः ।

चित्कम्पनेन स्कभीयान् ॥

स्कम्भनेनेत्यस्य पदस्य सकारापत्तिः । इति सर्वेषु त्रिक्रमेषु चतुःक्रमेषु विलक्षणत्वं योज्यम् ॥

एतेषां मध्यमपदान्यनवसानीयानि ॥

एतेषां त्रिपदचतुःपदादीनां यानि मध्यमपदानि तानि अनवसानीयानि । एष्ववसानं न कुर्यादित्यर्थः ॥

निरुक्तसारमस्कृतोपसमिति तु राज्यां पञ्चक्रमः ॥

पञ्च पदानि क्रमे यस्मिन् सम्भवन्त्यसौ पञ्चक्रमः । अत्राप्यकृतेति सकारलोपो विलक्षणः ॥

इति उपलेखभाष्ये द्वितीयो वर्गः ॥

परिगृह्याणि वक्ष्यामः ॥

परिगृह्यन्ते वेष्टयन्ते यानि पदानि तानि परिगृह्याणीति भण्यन्ते । तानि कथयिष्यामः ॥

अतीत्य परिगृह्णीयादवगृह्यस्य द्वितीये वचनेऽवग्रहः ॥

वेष्टनीयं यत्पदं तदतिक्रम्य परिगृह्णीयात् वेष्टयेत् । ओते । ओ इत्यो । अवगृह्यस्य द्विखण्डस्य वेष्टनकाले यत् द्वितीयं वचनम् तत्र खण्डनं कुर्यात् । पिबा पिबेत् । पिब पिबेति पिबऽपिब । सुषहासोम । सुसहेति सुऽसहा ॥

सहेतिकरणम् ॥

इतिकरणेन सहवक्तु ते यत् तत्सहेतिकरणम् । तच्च वेष्टयेत् । ओ इत्यो ॥

अवगृह्यम् ॥

द्विखण्डं यच्च वेष्टयेत् । आर्चत्कस्येत्यार्चत्कस्य ॥

आदिविकृतौ धक्षिधुक्षिप्रवादौ ॥

आदौ विकृतं विकारो ययोस्तावादिविकृतौ धक्षिधुक्षीत्येतौ सन्तौ च वेष्टयेत् । प्रवादग्रहणात् । एवं प्रवादानामादिविकृतानां परिग्रहार्थम् । यथा - दक्षत्र । धक्षदिति धक्षत् । दक्षि सूरयः । धक्षीति धक्षि । हि यानस्य दक्षोः । धक्षेरिति धक्षोः ॥

अन्तःपदविकृतमनन्यकारितम् ॥

अन्तर्मध्ये पदस्य विकारः यः तच्च वेष्टयेत्। सुसुमेति सुसुम। सिसिक्तेति सिसिक्त। शुनः शेपमिति शुनःशेपम्। नराशंसमिति नराशंसम्। ननामेति ननाम। दुधुक्षन्निति दुधुक्षन्। अधुक्षदित्यधुक्षत्। अन्यपदविकृतश्चेद्विकारो न भवति। इन्द्र एणाः। अग्नेरवेण। इन्द्र एणम् ॥

बहुमध्यगतानि ॥

बहूनां मध्ये गतानि बहुमध्यगतानि। तानि च वेष्टयेत्। शुनश्चिच्छेपं निदितमित्यत्र चिदितस्य त्रयाणां मध्ये गतत्वात्। चिदिति चित्। विद्धिषुणः स्त्रितिसु ॥

आकारश्चानुनासिकः ॥

अनुनासिको य आकारः तच्च वेष्टयेत्। ईष्ट आँ अग्नयः। एत्या। मित्रायोराँ एति। एत्या ॥

प्लुतादि च ॥

प्लवत इति प्लुतः। ह्रस्वात् प्लवते पयते इति दीर्घ एव प्लुतशब्देनोच्यते। यत्पदं ह्रस्वादि संहितायां दीर्घादि संजायते तच्च वेष्टयेत्। आयुक्षातामश्विना। अयुक्षातामित्ययुक्षाताम्। आरैक्पन्थाम् अरैगित्यरैक् ॥

अर्धर्चान्तं च ॥

अर्धर्चस्य अन्तं यत्पदं तच्च वेष्टयेत्। ऋत्विजमित्यृत्विजम्। एतानि वेष्टनीयान्युक्तानि ॥

इदानीं वेष्टनकाले लक्षणमाह —

संहितावत्पूर्ववचनं पदवदुत्तरम् ॥

संहितया तुल्यं वर्तते इति संहितावत्। पूर्वं च तद्वचनं चेति पूर्ववचनम्। पदेन तुल्यं वर्तत इति पदवत्। पूर्ववचनं संहितावद्ब्रूयात्। उत्तरं पदवत् ॥

तयोरितिकरणमाद्युदात्तं मध्ये स परिग्रहः ॥

तयोर्द्वयोर्वचनयोर्मध्ये इतिकरणमाद्युदात्तम् । इतिकरणमाद्युदात्तं ब्रूयात् । ते पदे तु संहितायां सत्यामन्तर्भूतो यः स परिग्रहः वेष्टनमित्यर्थः । इतिकरणस्योभयतः सन्धिर्न स्यात् । तस्यादिनानिंग्यमिव पुनर्वचनं स्वारयेयुः । वेष्टनीयानां पदानां इतिकरणस्योभयतः सन्धिर्भवति । स्वरित्येतस्य पदस्योभयतः सन्धिर्भवति । तस्य परिग्रहस्य स्वःपदस्य इतिकरणस्यादिना सह सन्धिर्भवति । अथान्तेन किमर्थं प्रतिषिध्यते ? स्वरितादेश्चेति करणान्तं नियच्छेत् इति सन्धौ नीचस्वरं वक्ष्यामि तन्माभूदिति। अनिंग्यमवसानम् । तदेव पुनर्वचनं स्वारयेयुः । इतिकारान्तं स्वारं कुर्वन्तीत्यर्थः ॥

शुद्धमाकारं प्रत्यादायोत्तरेण सन्ध्यात् ॥

शुद्धं निरनुनासिकं पुनरादायोत्तरेण सन्ध्यात् । यथासंहितं ब्रूयादित्यर्थः । इन्द्रेहि । एहि । अर्द्धर्चादौ न । एम् । ईमेनं । पश्चादोत्तरात् । ओत्तरात् । ह्वयामासित्वा । त्वेन्द्र । एन्द्र । पुनर्भूरोषाः । ओषाः । बहुमध्यगतानीत्येव प्रत्यादाने आकारस्य परिग्रहः कस्मान्न भवति ? तत्सत्यमेव । पदाकारश्चानुनासिक इति तदनर्थकमेव स्यात् । तस्मादनर्थकानि वचनानि ज्ञापकानि भवन्ति । अनन्यकारितशुनःशेपनराशंसपदयोश्चाकारस्यानुनासिकस्य परिग्रहो भवत्येवमर्थं ज्ञापयति ॥

समयात्परमाकारमर्द्धर्चादाविवोत्सृजेत् ॥

समयस्यान्तः समयात्परः तमर्द्धर्चादाविव यथा अर्द्धर्चादौ आकारः प्रत्यादानमकृत्स्नवैवोत्सृज्यते तथा समयात्परोपि ॥

न च तं समयं क्रामयेत् संहितं समयं ब्रूयात् ॥

तं समयं न क्रामयेत्। किं तर्हि? समयसहितं ब्रूयात्। अध्वर्यवो यः शतमासहस्रम्। आ सहस्रं। सहस्रं भूम्याः। स जोषसा उषसा सूर्येण चेषम्। इषं नः। धातुर्द्युतानात् सवितुश्च विष्णोरासूर्यात्। आसूर्यात्। सूर्यादभरन्।

ब्रूयात्तु समयोदयम् ॥

उदयशब्दः परवाची। समयः उदयो यस्य समयोदयः तं समयोदयम् ब्रूयात् पुनरादद्यादित्यर्थः।

अस्मादद्य सदसः सोम्यादाविद्याम मित्रो न योजनेष्वा यशः इति निदर्शनानि ॥

अविद्याम मित्रो न योजनेष्वायशः।

आकारः समयाद्यस्तु उकारो यस्तथाविधः।
द्वितीये वचने वाच्यौ समयेन सहैव तौ ॥

आदौ भवः आद्यः समयस्य आद्यः समयाद्यः आकारः तथाविध उकारश्च द्वितीये वचने समयेन सह तौ वाच्यौ। भुवनस्य गर्भ आरोदसी। आरोदसी अपृणाजायमानः ॥

त्रिक्रमः समयादौ चेत् पुनरध्यादिना सह तं पठेत्। ऊनुपत्नीरा सर्वतातिमिति निदर्शनानि ॥

आपुः सं। समूनु। ऊनुपत्नीर्वृषभिर्जगम्युः ॥

अकार इकार उकारान् व्यञ्जनपरान्वर्द्धमानान् पदवत् परिगृह्णीयात्। पुष्टवन्तो रथितमं सुमयमिति निदर्शनानि ॥

अकारश्च इकारश्च उकारश्च अकार इकार उकाराः तान् अकार इकार उकारान्। असंहितोच्चारणं स्पष्टप्रदर्शनार्थम्। व्यञ्जनानि पराणि येभ्यस्ते व्यञ्जनपराः तान् व्यञ्जनपरान्। अकार इकार उकारान् संहिता-

काले वर्द्धमानान् । पदवदुत्तरम् इत्यस्यापवादः । उदवनेत्युत्ऽअवता । रमय इति रमयः । परिवृता इति परिऽवृताः । अभिवर्तनेत्यभिऽवर्तेन । मक्षुमक्ष्विति मक्षुऽमक्षु । सुमयमिति सुऽमयम् ॥

अथ स्वरपराणि यथासंहितं परिगृह्णीयात् अक-वार्यधीमसि पुरू रुणेति निदर्शनानि ॥

तान्येव अ इ उ अक्षराणि स्वरपराणि वर्द्धमानानि यदा सम्भवन्ति तदा यथासंहितं परिगृह्णीयात् । देवावीरिति देवऽअवीः । अकवारीत्यकव-ऽअरी । अभीद्ध इत्यभिऽइद्धः । अधीमसीत्यधिऽइमसि । पुरू रुणेति पुरुऽउरुणा ॥

उदवता वर्जम् ॥

स्पष्टम् ॥

इत्युपलेखभाष्ये चतुर्थो वर्गः ॥

टवर्गीयं संहितायां यत्पदे तवर्गीयं तत्पदवत्परिगृह्णी-यात् । अभिस्तनेते गिरिस्थाश्चन्द्रनिर्णिगिति निदर्शनानि ॥

टकारेणादिभूतोपलक्षितो वर्गः टवर्गः । टवर्गे भवः टवर्गीयः । संहिताकाले यद्यक्षरं टवर्गीयम्, पदकाले तवर्गीयं तत्पदवद्वेष्टयेत् । अभिस्तने इत्यभिऽस्तने । त्रैस्तुभादिति त्रैस्तुभात् । गिरिस्थामिति गिरिऽस्थाम् । तिस्थिपदिति तिस्थिऽपत् । पितृयानमिति पितृऽयानम् ॥

पद्ये विसर्जनीयेतपरे सकारापत्तिः सन्धौ । मीळुस्त-मायाविस्त्य इति निदर्शनानि ॥

मींळुस्तमायेति मीळुःऽतमाय । आविस्त्य इत्याविःऽत्यः ॥

षत्वं सकारस्य तु पदवत्परिगृह्णीयात् । पुरुसन्त्योरिति निदर्शनम् ॥

पूर्वसूत्रात्पदे संहितायामिति वर्तते । संहिताकाले यस्य पदस्य षत्वं पदकाले सत्वं तत्पदवद्वेष्टयेत् । पुरुसन्त्योरिति पुरुऽसन्त्योः । सिसायेति सिसाय ॥

स्तष्टंभूतं स्थष्टंभूतं नृम्णभूतमादौ सष्भूतस्य तु पदवत् प्रत्यारम्भः । तमुष्टुहि केष्टा नरः प्रण इन्दो स्तुष ऊषुव इति निदर्शनानि ॥

स्पष्टम् ।

ऊष्मवृत्तेर्नकारस्य तु परिग्रहे प्रकृत्या । उदधीनिवास्मानस्मान् श्येनानिवाभीशूनीवेति निदर्शनानि ॥

ऊष्मणो वृत्तिर्यस्मिन्निति ऊष्मवृत्तिः नकारो रेफभूतस्तल्लोपश्च । अत्राप्यूष्मवृत्तेर्विद्यमानत्वात् । पदकाले यो नकारः तस्य संहिताकाले या ऊष्मवृत्तिः सा वेष्टनकाले प्रकृत्या भवति । नकार एव भवतीत्यर्थः । सिन्धूनिवेति सिन्धून्ऽइव । अस्मानस्मानित्यस्मान्ऽअस्मान् ॥

ऊष्मा षकारः सकारो वा कपवर उपाचारसंज्ञकस्तस्य लोपः परिग्रहे । चतुः पदी चतुः कपर्दा रायः कामः पथः पथ इति निदर्शनानि ॥

कश्च पश्च कपौ तौ परौ यस्मात् असौ कपरो य ऊष्मा षकारः सकारो वा तस्य वेष्टनकाले लोपः । न च वर्णविनाशो लोप इष्यते किं तर्हि स्वरूपेणादर्शनम् । कपरो जिह्वामूलीमापद्यते पपर उपध्मानीयम् । दक्षिणतः कपर्दा इति दक्षिणतःऽकपर्दाः । चतुःपादिति चतुःऽपात् । चतुःपदीति चतुःऽपदी । सहः कृतमिति सहःऽकृतम् । चतुःकपर्देति चतुःऽकपर्दा । इति आविः कृण्वतीमित्याविःऽकृण्वतीम् ॥

इत्युपलेखभाष्ये पञ्चमो वर्गः ॥

पूर्धूः स्वरिति पद्येष्वघोषवत्परेष्वन्तरा रेफलोपः परिग्रहे । पूः पतिं धूः सदं स्वः पतिमिति निदर्शनानि ॥

पदस्य अवयवः पद्यः पूः धूः स्वः इत्येतेषु पदावयवेषु सत्सु अघोषवन्तः परा येभ्यः ते अघोषवत्पराः । एतेष्वघोषवत्परेषु अन्तरा मध्ये यो रेफः तस्य वेष्टनकाले लोपः । पपरो विसर्जनीयमापद्यते । सकारपरः सकारम् । पूः पतिमिति पूःऽपतिम् । स्वः पतिमिति स्वःऽपतिम् । स्वः सातेति स्वःऽसाता । स्वःऽसामिति स्वःऽसाम् । धूः सदमिति धूःऽसदम् ॥

चपरे शकारापत्तिः सन्धौ । स्वश्चनाः स्वश्चक्षा इति निदर्शने ॥

पूर्वसूत्रात्स्वरित्यनुवर्तते । स्वरित्येतस्य पदस्य चकारे परे तस्य वेष्टनकाले पूर्ववल्लोपः शकारापत्तिश्च । स्वश्चना इति स्वःऽचनाः । स्वश्चक्षा इति स्वःऽचक्षाः ॥

परिपूर्वे कृपरेऽन्तरा पकारलोपः परिग्रहे परिकृण्वन्निति निदर्शनम् ॥

परीत्येतद्यत्र पूर्वपद्यम् । परः कृशब्दः मध्ये यः पकारः तस्य वेष्टनकाले लोपः । अयं वर्णाभावो लोपः । परिकृतस्येति परिऽकृतस्य । परिकृता इति परिऽकृताः । परि कृण्वन्निति परिऽकृण्वन् ॥

वनपूर्वे सदपरेऽन्तरा रेफलोपः परिग्रहे । वनसद इति निदर्शनम् ॥

वन इत्येतस्मिन् पूर्वे सद उत्तरे मध्ये यो रेफः तस्य वेष्टनकाले अभावो लोपः । वनर्षदो वायवः । वनसद इति वनऽसदः ॥

ह्रस्वे च पूर्वपद्यान्ते चन्द्रशब्द उत्तरेऽन्तरा शकारलोपः परिग्रहे । सुचन्द्रं पुरुचन्द्रं हरिचन्द्रमिति निदर्शनानि ॥

यत्र पूर्वपद्यस्यान्तो ह्रस्वो भवति। चन्द्र शब्दे परे तत्र तयोर्मध्ये यः शकारः तस्य वेष्टने शकारस्य अभावो लोपः स्वश्चन्द्रमभवत्। स्वश्चन्द्रमिति स्वऽचन्द्रम्। विश्वचन्द्र इति विश्वऽचन्द्रः। हरि चन्द्र इति हरिऽचन्द्रः। सुचन्द्रमिति सुऽचन्द्रम्। पुरु चन्द्रमिति पुरुऽचन्द्रम् ॥

धक्षि धुक्षि जुघुक्षतोऽकृतस्कंभनेनेतिपदवत्परिगृह्णीयात् ॥

धक्षि धुक्षि धक्षत् जुघुक्षतः दुधुक्षन् अकृतस्कम्भनेनेत्येतानि पदवद्वेष्टयेत् ॥

दूड्यदूणाशदूलभप्रवादानुकारभूतान् रेफसहितान् पदवत्परिगृह्णीयात्। दुध्यदुर्दभदुर्नश इति निदर्शनानि ॥

दूड्यदूणाशदुलभ इति एतान् प्रवादान् ह्रस्वेन उकारेण रेफेण च संयोगं कृत्वा पदवद्वेष्टयेत्। दुर्ध्यः१ इति दुःऽध्यः। दुर्ध्य१ इति दुःऽध्ये। दुर्ध्येति दुःऽध्या। दुर्नशमिति दुःऽनशम्। दुर्नशेति दुःऽनशा। दुर्दभ इति दुःऽदभः। दुर्दभसा इति दुःऽदभास ॥

स्वधितिरिवेति रेफसहितम् ॥

स्वधितिरिवेत्येतत् पदं रेफसहितम् पदवद्वेष्टयेत्। स्वधितिरिवेति स्वधितिःऽइव ॥

ज्योतीरथ प्रवादं यथासंहितम् ॥

अकार इकार उकारपरान् व्यञ्जनपरान् वर्द्धमानान् पदवत्परिगृह्णीयात्। इत्यनेन च पदवत्परिग्रहे प्राप्ते इदमारभ्यते। ज्योतीरथ प्रवादानां वेष्टनकाले पूर्ववचनं संहितावद्ब्रूयात्। ज्योतीरथमिति ज्योतिःऽरथम् ॥

इत्युपलेखभाष्ये षष्ठो वर्गः ॥

पदान्तस्येतेश्च सन्धी वक्ष्यामः ॥

पदस्य अन्तः पदान्तः । यदुक्तं संहितावत् पूर्वं वचनं पदवदुत्तरम् । तयोरितिकरणमाद्युदात्तं मध्ये स परिग्रहः 'इति' तस्य करणस्य च ये सन्धयो भवन्ति तान् कथयिष्यामः ॥

अकाराकारावेकारम् ॥

अकारश्च आकारश्च आकाराकारौ तौ पदान्तौ इति करणस्य इकारेण सह एकारमापद्यन्ते । विश्वसौभगेति विश्वऽसौभग । हिरण्यवाशीवत्तमेति हिरण्यवाशीवत्ऽतम । सप्तस्वसेति सप्तऽस्वसा। सुजुष्टेति सुऽजुष्टा ॥

इकारेकारावीकारम् ॥

इकारश्च ईकारश्च इकारेकारौ तौ पदान्तौ इति करणस्य इकारेण सह ईकारमापद्यते । विभावरीति विभाऽवरी । सानसीतिसानसी । आपप्रुषीत्याऽपप्रुषी ॥

उकारो वकारम् ॥

उकारः पदान्त इतिशब्दे परतः वकारमापद्यते । देवय्विति देवऽयु । विभ्विति विऽभु ॥

औकार आकारभूतो वकारम् ॥

औकारः पदान्त इति करणे परे आकारवकारौ आपद्यते । ऋतवृधाविति ऋतऽवृधौ । सजोषसाविति सऽजोषसौ ॥

एकार आकारो विवृत्या ॥

एकारः पदान्त आकारभूतो विवृत्या वेष्टयेत् विश्वाजित इति विश्वऽजिते । वावृधध्या उषासानक्ता । ववृधध्या इति ववृधध्यै । परादा इति पराऽदै ॥

एकार आकारभूतो विवृत्या। विन्दतीति दीर्घसन्धि परिगृह्णीयात् ॥

विन्दतीति एवमीकारं दीर्घसन्धिं परिगृह्णीयात् वेष्टयेत्। दीर्घः सन्धिः यस्य सः दीर्घसन्धिः। प्लुतसन्धिः त्रिमात्रोच्चारणम् ॥

द्वितीये वचने पदवत्प्लुतिः ॥

तस्यैव इकारस्य वेष्ट्यमानस्य यद् द्वितीयं वचनं तत्र प्लुतिः कार्या। पदवच्च सानुनासिकं उच्चारणीयम्। विन्दतीति विन्दतीँ ॥

ऊष्मान्तं रेफेण ॥

ऊष्मान्तं विसर्गान्तं यत्पदं तस्य इतिशब्दे परे रेफेण सह सन्दध्यात्। अद्भिरित्यत्ऽभिः। मधोनीरिति मधोनीः। देवयुरिति देवऽयुः। दर्शताभूः। भूरिति भूः। च ऋषेः। ऋषेरित्यृषेः। सचेमहि सचध्यैः। सचध्यै३ऽरिति सचध्यैः। दिवः पृथिव्योरिति दिवःपृथिव्योः। वर्तनिङ्गौः। गौरिति गौः ॥

अकाराकारयोरन्तरा ऊष्मपदे संहितायां वा रिफितो रेफेन ॥

अकारश्च आकारश्च अकाराकारौ। तयोः अकाराकारयोः अन्तरा अन्तस्थः ऊष्मा पदकाले संहितायां वा सः रिफितः रेफेण वेष्टयेत्। दोषावस्तर्द्धिया। दोषावस्तरिति दोषाऽवस्तः पुनःपुनर्जायमाना। पुनःपुनरिति पुनःऽपुनः। देवंयाः परावतः। भारिति भाः। हन्तनावधः। वधरितिवधः। धाराभिरक्षाः। अक्षारित्यक्षाः ॥

अरिपितोविवृत्या ॥

अकाराकारयोः परो यः ऊष्मा पदे संहितायां वा रिफितः स विवृत्या वेष्टनीयः। दभीति मावः। आव इत्यावः। बृहत् भाः। भा इति भाः। वातजूतास्तरणीभिरेवैः। वातजूता इति वातजूताः ॥

अहरहः शुन्ध्युः ॥

अरिफितौ रेफण वेष्टनीयः । अहरहः शुन्ध्युः । अहरह इत्यहः ऽअहः ॥

वर्गाणां प्रथमान्तं स्वेन तृतीयेन ॥

वर्गाणां प्रथमाः कचटतपाः तदन्तं यत्पदं स्ववर्गे तृतीयेन सह तद्वेष्टयेत् । हिरण्यनिर्निगिति हिरण्यऽनिर्निक् । शुचिसदिति शुचिऽसत् सुबिति सुप् ॥

स्वेनोत्तमान्तमुत्तमेन ॥

वर्गाणामुत्तमाः ङञणनमाः तदन्तं यत्पदं तच्छ इति शब्दे परे स्वेनोत्तमेन सह सन्दध्यात् । धनञ्जयमिति धनऽञ्जयम् ॥

ह्रस्वपूर्वौ इनवन्तौ क्रामयेत् । मघवन् सद्दङिति-निदर्शने ॥

ह्रस्वः पूर्वो ययोस्तौ ह्रस्वपूर्वौ तयोः क्रान्तिं कुर्यात् परिग्रहे । मघवन्निति मघऽवन् । सद्दङिति सऽद्दङ् ॥

दर्दितिवर्गितिपर्यावर्दिति ॥

एतेषां दकारगकारौ परिग्रहे क्रामयेत् । दर्दिति दर्द् । वर्गिति वर्ग् । पर्यावर्दिति परिऽआवर्द् ॥

सहेतिकरणे यथा पदवत्सन्धिः ॥

पूर्वोक्तविधेरयमपवादः । प्रगृह्य पदे वेष्टयमाने यथा पदवत् सन्धिः । चर्मणी इवेति चर्मणीऽइव । अभिस्तुते इत्यभिऽस्तुते । अस्मे इत्यस्मे ॥

ष्णुसंहिते स्नुभिपदे यथा पदप्रत्यारब्धः ॥

स्पष्टार्थमेतत् । अधिष्णुभिः । स्नुभिरवीनाम् । स्नुभिरिति स्नुऽभिः ॥

टकारान्तं इकारेण विभ्रा इति निदर्शनम् ॥

पूर्वोक्तविधेरयमपवादः । टकारान्तं यत्पदं तस्य इति शब्दे परतः इकारेण सह सन्दध्यात् वेष्टयेदित्यर्थः । भोजते विट् । विळिति विट् । विभ्राड् बृहत् । विभ्राळिति विऽभ्राट् ॥

इत्युपलेखभाष्ये सप्तमो वर्गः ॥

उक्तः सन्धिः पदान्तानाम् ॥

पदानामन्ताः तेषां पदान्तानां वेष्टनकाले इति करणेन सह सन्धिर्व्याख्यातः । उक्तस्यानुकीर्तनं वक्ष्यमाणेन सह सम्बन्धसिद्धये ॥

पदादीनां वक्ष्यामः ॥

पदानामादयः तेषां पदादीनामिति करणान्तेन सह ससन्धयो भवन्ति । वेष्टनकाले तान् वक्ष्यामः ॥

स्वरादि तयकारयोः संयोगमापद्यते ॥

अकारादिः स्वरदक्तः स्वरदर्शनम् । स्वर आदिर्यस्य पदस्य तत्पदं वेष्टनकाले इति करणान्तेन सहमानं तयकाराभ्यां सह संयोगमापद्यते । ऋत्विजमित्यृत्विजम् । ऋष्वौजा इत्यृष्वऽओजाः ॥

इकारेकारवर्जम् ॥

इकारश्च ईकारश्च इकारेकारौ तौ वर्जयित्वा अन्यद्यत् तकारयकाराभ्यां संयोगमापद्यते । इकारईकारयोर्नापद्यते ॥

तावीकारमापद्यते ॥

तौ इकार ईकारौ इति करणान्तेन सह ईकारं प्राप्नुतः । इक्षुहस्तेनेतीक्षुऽहस्तेन । अपामिति । इतीतीति । न्वीयते । ईयत इतीयते ॥

व्यञ्जनाद्यसंयुक्तं प्रकृत्या ॥

स्वरानन्तर व्यञ्जनमादौ यस्य पदस्य तद् व्यञ्जनादि यत्पदं

असंयुक्तं तत्र इति करणान्तेन सह प्रकृत्या सन्दध्यात् । परंरूपेणेत्यर्थः । श्रृतपाकमिति श्रृतऽपाकम् । । पृश्निगाव इति पृश्निऽगावः ॥

संयोगादि चकारादि च क्रामयेत् ॥

संयोगः आदिर्यस्य पदस्य तत्संयोगादि चकार आदिर्यस्य पदस्य तच्चकारादि संयोगादि यत्पदं तच्चकारादि च इति करणात् परं तदादि-क्रामयेत् द्वित्वं कुर्यादित्यर्थः । मृक्षकृत्वेति मृक्षऽकृत्वा । प्रुषितप्सुरिति प्रुषितऽप्सुः । श्रुतऋषिमितिश्रुतऽऋषिम् । च्छन्दस्तुभ इति च्छन्दः-ऽस्तुभः ॥

उदात्तादनुदात्तं स्वारयेन्नचेत्स्वरितोदात्तपरम् ॥

उदात्तपरमनुदात्तं स्वरितोदात्तपरं न चेत् स्वारयेत् । तत्स्वरितं कुर्यादित्यर्थः । अग्निमीळे । अग्निर्देवता ॥

उदात्तेनैकीभूतमुदात्तं भवेत् ॥

उदात्तेन सहैकीभूतं स्वरमुदात्तमेव भवति । वक्ष्यतीति वक्ष्यति । इतीतीति ॥

नियतं नियच्छेत् ॥

नियतं नीचमनुदात्तमिति पर्यायः । पूर्वकृतं रूपमाभिक्रमेद्यथा-संहितं इत्यत्र पूर्वेण कृतं पूर्वकृतं इति उच्यमाने पदान्तप्रचयाव्यवहितेऽपि पूर्वकृतः प्रचयः कस्मान्नान्तर्भवतीति यो मन्यते मन्दबुद्धिः तमुद्दिश्य स्पष्टार्थमिदमारभ्यते । अनुदात्तात्परमनुदात्त एव भवति । य इन्द्र । इन्द्रसोमपातमः । न घ । घेम् । ईं मन्यत् । इमं मे गङ्गे यमुने सरस्वति ॥

स्वरितात्प्रचयस्वरं नयेत् ॥

स्वरितात्परमनुदात्तं प्रचयस्वरं प्रापयेत् । अग्निमीळे । उपापेमे । स्वरितात्पराणि यानि कानिचिदनुदात्तानि सर्वाणि प्रचयं स्वरं यान्ति । यथा - ऋतेन मित्रा वरुणावृतावृधा वृतस्पृशा ॥

स्वरितात्पराणि यान्यनुदात्तानि कानिचित् सर्वाणि प्रचयं यान्ति उपोदात्तं निहन्यते ॥

उपशब्दः समीपवाची । उदात्तस्यानुदात्तस्य परः सोऽनुदात्तः । न विद्यते उदात्तो यस्य स्वरस्य सः अनुदात्तः । उपोदात्तं निहन्यते । प्रचयस्वराभ्यामनुदात्तं भवतीत्यर्थः । व्यक्ता इति विऽअक्ताः । उपोपेत्युपऽउप ॥

नियतादिपदस्य व्यञ्जनादेरिति करणान्तं स्वारयित्वा पदं प्रकृतिवद्ब्रूयाद्ब्रह्मधातममिति निदर्शनम् ॥

नियतमादौ यस्य पदस्य तत्पदं नियतादि अनुदात्तादीत्यर्थः । व्यञ्जनमादौ यस्य पदस्य तद्व्यञ्जनादि नियतव्यञ्जनादेः पदस्य इति करणान्तं स्वरितं कृत्वा पदं प्रकृतिवद्ब्रूयात् । सुरूपकृत्नुमिति सुरूपऽकृत्नुम ॥

अथ स्वरादेराद्यमक्षरं सहेतिकरणान्ते स्वारयित्वा पदशेषं प्रकृतिवद्ब्रूयात् । अललाभवन्तीरिति निदर्शनम् ॥

पूर्वसूत्रात् नियतादेः पदस्येत्यनुवर्त्तते । तथा नियतादेः स्वरादेः पदस्य प्रथममाद्यं वर्णमितिकरणान्तेन सह स्वरितं कृत्वा पदशेषं प्रकृत्यैवोच्चारयेत् । अर्हरिस्वनिरित्यर्हरिस्वनिः । आय इत्याऽअये । ऋष्वञ्ज इत्यृषुऽअञ्जः । ऋजुमुष्का इत्यृजुऽमुष्काः । ऋणं च यस्येत्यृणंऽच यस्य ॥

उदात्तस्योदात्तादेश्च व्यञ्जनादेरेकाक्षरनियतस्य च स्वरादेः स्वरितादेश्चेतिकरणान्तं नियच्छेत् । त्वे इति वायो इत्यत्र निदर्शनानि ॥

उदात्तस्य पदस्योदात्तादेः व्यञ्जनादेश्च एकाक्षरं नियतं यस्य पदस्य तदेकाक्षरनियतं स्वरादिरिति तस्यैव विशेषणम् । एकाक्षरानियतस्य

च स्वरादेः स्वरितादेः पदस्य चैतेषां चतुर्णामितिकरणान्तमनुदात्तं कुर्यात्। स इति सः। त इति ते। मनोजवसेति मनःऽजवसा। अप्तुर इत्यप्ऽतुरः। अप्स्वित्यप्ऽसु। आधा इत्याधै। स्वर्वतीति स्वः-ऽवति। व्योमतीति विऽओमती। को३इति को॥

उदात्तस्योदात्तादेश्च स्वरादेरितिकरणमुदात्तं भवेत्॥

स्वरादेः उदात्तादेः उदात्तस्य स्वरादेरुदात्तादेः पदस्य च इतिकरणान्तमुदात्तमेव भवति। एत्या। ओ इत्या। ऋषिभिरित्यृषिऽभिः॥

सर्वं नियतं प्रचयस्वरं नयेत्॥

इतिकरणात्परं सर्वमनुदात्तं प्रचयस्वरं प्रापयेत्। अच्युतच्युदित्यच्युतऽच्युत्॥

समापाद्यान्युत्तरे पद्परेराधोरथोग्रादिवोजा ऋतश्च।
अङ्गः पादुः प्रेति च पूर्वपद्यावनिङ्नयन्विक्रममेषु कुर्यात्॥

क्रमाद्वै पदशः इत्येतेन पदप्रकृतित्वे निघातम्। तथा सति राधः पदेषु न केन विलक्षणेन यत किञ्चान्तविहितम्। तस्मात् न राधादिषु पदेषु अनेन विधिर्विधीयते। राधः। रथः। ग्राः। दिवः। जाः। ऋतः। इत्येतेषां पदावयवानां षण्णां परे समापाद्य संज्ञान्ता भवति। पूर्वपद्यावयवानां अङ्गः पादुः प्रेत्येतौ च एषु समापाद्यैषु पदेषु अखण्डयन् विक्रमं कुर्यात्। परिग्रहेऽवसानं कुर्यादित्यर्थः॥

कम्पयेन्नीचस्वरितं ह्रस्वदीर्घावुभौ स्वरौ॥

यस्मिन् पदे यत् स्वरितमनुदात्तपूर्वं यकारयुक्तं तन्नीचस्वरितं विद्यात्। तच्च कम्पयेत्॥

ह्रस्वदीर्घाविति तावुभौ स्वरावपि कम्पयेत्॥

परिग्रहे सुभ्व१ इति सुऽभ्वः। आकाय्य१स्येत्याकाय्यस्य।

मनुष्या३निति मनुष्यान्। अनूक्या३दित्यनूक्यात्। सृण्ये३वेति सृण्या३इव ॥

ह्रस्वे ह्रस्वं विजानीयाद्दीर्घे दीर्घं तथैव च।
स्वरितस्यानुरूपेण कम्पं कुर्वीत शास्त्रवित् ॥

कम्पस्य लक्षणान्तरे यदुक्तं कम्पयेत् कम्पं इत्यादि तस्यार्थपदं विचार्यते। इह शास्त्रे नव कम्पस्य कालो विधीयते। ह्रस्वे कम्पमाने पुनः ह्रस्वं विजानीयात्। ह्रस्वपदामित्यर्थः। दीर्घेऽपि तथैव दीर्घम्। अनुरूपेणेत्यनेन स्वरितस्य सादृश्यं पदञ्चार्थमात्रञ्च यथाक्रमेण कम्पस्य कालमाहुः शौनकादयः ॥

अन्यं पदं विचार्येत उदात्तो यत्र दृश्यते।
कम्पं तत्र न कुर्वीत न चोदात्तेन संयुतम् ॥

कम्पयेत् नीचस्वरितं इत्यस्य सामान्यसूत्रस्यापवादः न चोदात्तेनेति अयमपि नीचस्वरितस्य उदात्तैनैकोदेशेऽपि कम्पो न भवतीति। वीर्येति वीर्या ॥

उदात्तात् स्वरिताद्वापि कम्प उत्पद्यते क्वचित् ॥

नियमार्थोयमारम्भः। स्वरितस्य यदि कम्प उत्पद्यते। उदात्तपूर्वो यः स्वरः स्वरितार्द्धपूर्वो वा यः स्वरः स एवेति ॥

संहितायां पदे वापि नीचस्वरितमुच्यते।
तत्पदं हि भवेत्कम्पमाकारान्तञ्च वर्जयेत् ॥

एकस्मिन् पदे यत्र स्वरितं संहिताकाले युक्तमयुक्तं वा अनुदात्तात् पूर्वं दृश्यते तत्स्वरितवत्पदं परिग्रहणे कम्पयेत्। अभ्य१भीत्याभिऽअभि। रीत्या३पेति रीतिऽआप। सुची३वेति सुचिऽइव। चम्पी३वेति चम्पिऽइव। वीर्ये३णेति वीर्येण। पुरी३वेति पुरिऽइव। शुची३वेति शुचिऽइव ॥

क्रमकाले त्वकम्पः स्यान्नीचश्चेदुत्तरं पदम् ॥

अनेनोदात्तात् स्वरितात्परेभ्यो नियतम्। अस्य विशेषविषयमाह क्रमकाले इति। क्रमकाले परिग्रहे काले उदात्तात् स्वरितात्पूर्वो यः स्वरितः तयोर्मध्ये अनुदात्तेनाक्षरेण व्यवहिते च कम्पो न भवतीति ॥

न्यगित्येतस्यानीचानामपि कम्पः व्योमेतनीचीबेत्युदात्तादीनाम् ॥

नीचस्वरितस्य स्वर उक्तः अनेनानीचानां व्योमप्रकृतीनामुदात्तानामपि न्यगित्येतस्य कम्पो विधीयते ॥

व्यक्तारीत्यापेत्याकारान्तयोरपि च ॥

स्पष्टार्थमेतत् ॥

प्रशस्तकृदेकस्यचिदतोनोरुद्राः क१वोश्वाः प्रथमं नाना ह्य१ग्ने त्वां हींद्रकदन्वास्याभ्यार्षेयेषमूर्ज क्रमकाले नवकम्पलोपः ॥

सर्वमेवान्यदपि यथासंहितमाचरेत् इत्यस्यायमपवादः । समयादौ तं व्यवहितपदसन्धिनिमित्तो ह्येषु कम्पः ॥

यथापदं द्वैपदान्तेवस्येत् ॥

द्विपदानामन्ताः। द्विपदान्तेषु पदावसानमेवावस्येत्। अवसानं कुर्यादित्यर्थः। क्रमो द्वैपदशः इत्यस्यायं शेषः ॥

समयान्ते द्वैपदेऽवस्येन्न च तं समयं क्रामयेत् ॥

समयादौ तत्पूर्वेण पदेन सह समयादिपदे गृहीते सति अवस्येत्। प्रप्रवः। प्रप्रेति प्रऽप्र ॥

सन्ध्याय समयं परेण द्वैपदेऽवस्येत् ॥

ततः सर्वसमयं परेण सन्धाय तस्य द्वैपदेऽवस्येत् । संहितं समयं ब्रूयात् इस्यस्यायं विशेषः । वस्त्रीष्टुभामिषं मन्दद्वीरायेन्दवे ॥

एकं समये मध्ये चेदतिक्रम्य पदेन तत् ॥

यदि एकमेव पदं समयं परं हि तस्य समयः मध्ये भवति । तदा पूर्वेण समयेन सह तत्पदमतिक्रम्य उत्तरेण पदेन अवस्येत् । ताश्चित् । चिन्नुनमरन्ति इत्यादौ ॥

त्र्यम्बकं भद्रं नः प्रजापते ऋतं च सत्यं चेत्यपदक्रमम् ॥

क्रममिममुभयाभिगीतम् द्विजवरगुरुणादरेण पठितम् ।
पठितापि पुण्यकर्मा भवति शास्त्रमुपलेखम् शास्त्रमुपलेखम् ॥

नमः शौनकाय

इति उपलेखसूत्रं संपूर्णम् ॥


Sri Vani Vilas
Press,
Srirangam